LAKṢMĪSTUTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 63*a* of the MS. described under No. 757.

Complete.

Same work as the above, without the first stanza.

No. **9737.** लक्ष्मीस्तुतिः.

LAKṢMĪSTUTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 7097.

Complete.

Same work as the above, with the addition of one stanza as given below :—

आरूढतार्क्ष्यमहिराजफणातपत्रमङ्के निवेशितसरोरुहवासिनीकम् ।
आमुक्तकल्पतरुतोरणमात्तचक्रमग्रे ममास्तु परवस्तु नृसिंहरूपम् ॥

No. **9738.** लक्ष्मीस्तुतिः.

LAKṢMĪSTUTIḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 61*a* of the MS. described under No. 139.

Complete.

Same work as the above.

No. **9739.** लक्ष्मीस्तुतिः.
LAKṢMĪSTUTIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol 96*a* of the MS. described under No. 9001.

Complete.

Same work as the above.

No. **9740.** लक्ष्म्यष्टकम्.
LAKṢMYAṢṬAKAM.

Pages, 3. Lines, 15 on a page.

Begins on fol. 75*a* of the MS. described under No. 5959.

Complete.

Similar to the above, but consists of eight stanzas. It is stated herein that Goddess Lakṣmī confers prosperity on those who read this Stōtra sixteen times.

Beginning:

श्रीमत्रिपाद्विभूतीशनारायणहृदालयाम् ।
विकलेबरकैवल्यमहालक्ष्मीमहं भजे ॥
नत्वा श्रीगुरुपादाब्जं महालक्ष्म्यष्टकं मया ।
लक्ष्मीकटाक्षमिच्छूनां भक्तानामिदमुच्यते ॥
दरिद्रसार्वभौमोऽपि यत्प्रसादलवांशतः ।
कुबेरसंपदं गच्छेत् सा मे लक्ष्मीः प्रसीदतु ॥
यत्कटाक्षकलामात्रान्नलो राजा महीतले ।
चक्रवर्तित्वमगमत्सा मे लक्ष्मीः प्रसीदतु ॥

End:

द्व्यष्टवारं ये पठन्ति लक्ष्म्यष्टकमिदं द्विजाः ।
वाञ्छितां श्रियमापुस्ते महालक्ष्म्याः प्रसादतः ॥

No. **9741.** श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 9012.

Complete.

Same work as the one described under R. No. 160(*f*) of the Triennial Catalogue of MSS., Vol. I, Part I–A. Herein Goddess Lakṣmī is identified with Goddess Raṅganāyakī worshipped at Śrīraṅgam and is praised as the bestower of all power and prosperity.

No. 9742. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 26. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 9660.

Complete.

Same work as the above.

No. 9743. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 26. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other work herein is Stōtraratna 1*a*.

Complete.

Same work as the above.

No. 9744. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 15. Lines, 24 on a page.

Begins on fol. 34*a* of the MS. described under No. 5959.

Complete.

Same work as the above.

No. 9745. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 17. Lines, 6 on a page. Character, Kanarese and Grantha. Condition, slightly injured. Appearance, old

Begins on fol. 18*b*. The other works herein are Āhnika 1*a*, Gadyatraya 7*a*, Śrīraṅgarājasuprabhāta 27*a*, Śrīraṅgarājaprapatti

27*b*, Śrīraṅgarājamaṅgalāśāsana 28*b*, Vēṅkaṭēśasuprabhāta 29*a*, Vēṅkaṭēśaprapatti 29*b*, Vēṅkaṭēśamaṅgalāśāsana 30*a*, Dēvarāja-suprabhāta 31*a*, Dēvarājaprapatti 31*b*, Dēvarājamaṅgalāśāsana 32*a*, Parāṅkuśapañcaviṁśati 33*a*, Parāṅkuśāṣṭaka 35*a*, Śrīstava 35*b*.

Complete.

Same work as the above.

No. 9746. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 19. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2964.

Complete.

Same work as the above.

No. 9747. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 7016.

Complete.

Same work as the above, but with a different colophon as given below :—

इति हरितकुलतिलकस्य श्रीवत्साङ्कमिश्रसूनोः श्रीरङ्गराजदिव्याज्ञा-लब्धश्रीपराशरभट्टापरनामधेयस्य श्रीरङ्गराजस्य कृतिषु श्रीगुणरत्नकोशः समाप्तः ॥

No. 9748. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 9. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 5025.

Complete.

Same work as the above.

No. 9749. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 19. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5224, wherein this work has been mentioned as Śrīstava in the list of other works given therein.

Complete.

Same work as the above, but without colophon.

No. 9750. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 7015.

Incomplete.

Same work as the above

No. 9751. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 9. Lines, 7 on a page.

Complete.

Begins on fol. 107*a* of the MS. described under No. 2079

Same work as the above, but with the addition of one stanza at the end as given below :—

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
धात्रीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

These three stanzas giving the dates of birth of Śaṭhakōpa, Rāmānuja and Śrīvatsāṅkamiśra, are found given at the end of this work :

श्रीविज्ञानदिनोत्तरेऽहनि कलौ वर्षे प्रमात्याह्वये
मासे माधवनाम्नि भार्गवदिने चर्क्षे विशाखाभिधे ।

लग्ने शुद्धचतुर्दशीतिथियुते श्रीमत्कुलीरेऽपि च
क्षित्यां प्रादुरभूत् पराङ्कुशमुनिर्भाग्योदयोऽस्मादृशाम् ॥
कलचञ्दे दिव्यकुम्भे बुधजनविदिते वत्सरे पिङ्गलाख्ये
चैत्रे मासे गते च त्रियुतदशदिने दीप्यमाने हिमांशौ ।
पञ्चम्यार्द्रासमेते सुरगुरुदिवसे कर्कटोपाख्यलग्ने
श्रीमान् रामानुजार्यः समजनि निगमाद्यात्मसंरक्षणार्थम् ॥
कलचञ्दे कविपावने मकरगे सूर्ये च शुक्लोत्तरे
वर्षे भानुतृतीयवासरवरे कृष्णे च पक्षोत्तमे ।
पञ्चम्यां कविशैलसेतुरनघे नक्षत्ररत्येऽपि च
श्रीवत्साङ्कसुधीरवातरदसौ भूलोकपुण्योदयः ॥

No. 9752. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 5777.

Complete.

Same work as the above, but without colophon and with the addition of one stanza at the end as given below :—

प्रमाणनखानभिर्न्निर्वादमत्तिभमस्तकः ।
राजते निगमान् गर्जन् श्रीपराशरकेसरी ॥

No. 9753. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Mukundamālā 6*a*, Viṣṇustōtra 13*a*.

Complete.

Same work as the above.

No. 9754. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 10. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol 26*a*. The other works herein are Vaikuṇṭhastava 1*a*, Atimānusastava 7*a*, Śrīraṅgarājastava 10*b*, Vēṅkaṭēśamaṅgalāśāsana 25*a*, Vēṅkaṭēśaprapatti 25*b*.

Same work as the above.

No. 9755. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 4*b* of the MS. described under No. 9534.

Incomplete.

Same work as the above.

No. 9756. श्रीगुणरत्नकोशः.
ŚRĪGUṆARATNAKŌŚAḤ.

Pages, 6. Lines, 18 on a page.

Begins on fol. 24*a* of the MS. described under No. 2043.

Incomplete.

Same work as the above.

No 9757. श्रीगुणरत्नकोशः—कर्णाटकटीकासहितः.
ŚRĪGUṆARATNAKŌŚAḤ WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 79. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same work as the above, but with the addition of a Kanarese commentary by Śrīnivāsasūri of Viśvāmitragōtra.

विश्वामित्रकुलोद्भूतश्रीनिवासेन सूरिणा ।
कृता श्रीगुणरत्नस्य टीका विश्वमनोरमा ॥

Colophon:

इति श्रीगुणरत्नकोशव्याख्यानं समाप्तम् ॥

No. **9758.** श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 62. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the one described under R. No. 758(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-C.

No. **9759.** श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Substance, paper. Size, $8\frac{1}{4} \times 5\frac{3}{8}$ inches. Pages, 122. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Nigamāntārya-carita 63*a*.

Complete.

Same work as the one described under R. Nos. 297(*a*) and 671(*a*) of the Triennial Catalogue of MSS., Vol I, Part I, wherein the beginning and the end have not been given.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
लक्ष्मीकटाक्षविक्षेपा रक्षणैककृतेक्षणाः ।
रक्षन्त्वनुकूलकरुणाः सन्धुक्षितजगत्त्रयाः ॥

अथ सर्वेश्वराभिमतानुरूपस्वरूपगुणविभवां सकलपुरुषार्थप्राप्तौ सकल-चेतनानां सर्वेश्वरं प्रति पुरुषकारभूतां सर्वेश्वरवत्स्वयमपि प्राप्यप्रापक-

भूतां श्रियं सकलजनोज्जीवनार्थं च स्तोतुकामः प्रबन्धादौ तामेव प्रण मति—

श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः साथयन्त्यै कृतोऽञ्जलिः ॥

अथ सर्वेश्वरं सर्वदा श्रयतीति श्रीः, तत्तत्पुरुषार्थकामैराश्रीयत इति वा श्रीः, स्वाश्रितदोषान् शृणातीति वा श्रीः । तस्यै श्रियै अञ्जलिः कृतः ।

End:

मनोरथशेषं प्रार्थयते —श्रीरङ्गेति । निष्कण्टकादिपदत्रयं क्रियाविशेषणम् । दास्यरसिकां दास्यरससहिताम्; दास्यरससमृद्धिमिति यावत् ।

* * * *

कृपां निर्हेतुकदयाम् ; अस्मद्विषये स्वीकुरुष्वेति सर्वं समञ्जसम् ॥

Colophon:

इति श्रीमद्रामानुजाचार्यविरचितं श्रीगुणरत्नकोशव्याख्यानं सम्पूर्णम् ॥
वेङ्कटाचार्यशिष्येण रामानुजविपश्चिता ।
लक्ष्मीगुणस्तुतिव्याख्या यथामति विनिर्मिता ॥

No. 9760. श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 17⅞ × 1⅜ inches. Pages, 39. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning; otherwise complete.

Same work as the above.

No. 9761. श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Pages, 20. Lines, 8 on a page.

Begins on fol. 46*a* of the MS. described under No. 5245. Breaks off in the 19th stanza.

Same work as the above.

No. **9762.** श्रीगुणरत्नकोशव्याख्या.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀ.

Pages, 70. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 5351.

Complete.

Same work as the above, but with a different beginning as given below :—

Beginning :

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रीकूरकुलपयःपारावारपार्वणचन्द्रमाः चतुर्दशविद्याविलासिनीविलास-मुकुरबिम्बायमानः श्रीरङ्गनायककरुणासमासादितकुमारः साम्राज्यलक्ष्मी-निवासभूतः श्रीरङ्गराजभट्टनामधेयः कविरविघ्नेन प्रारिप्सितग्रन्थपरिसमा-प्त्यै स्वीकृतग्रन्थप्रतिपादितदेवतामेवादौ नमस्करोति ।

No. **9763.** श्रीगुणरत्नकोशव्याख्या.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 57. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Similar to the above. By Vīrarāghava of Vādhūla family on whom the title of Amṛtakavi is said to have been bestowed by one Rāmānuja. The commentary is called Vasurāśi.

This MS is said to have been copied by Appaya Appanayyaṅgār of Piḷḷaipākkam.

Beginning :

अभङ्गुरकलादानस्थूललक्षत्वमीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥
श्रीगुरुपङ्क्तिपादसरसीरुहसंविनतः
श्रीगुणरत्नकोशविवृतिं वसुराश्यभिधाम् ।

* * * *

श्रीयुतवीरराघवगुरुर्वितनोति पराम् ॥
श्रीमन्महाहरितवंशविशुद्धवृत्त-
मुक्तामणिस्सकलशास्त्रविदग्रगण्यः ।
भट्टारको विरचयन् गुणरत्नकोशः
स्तोत्रं . . . .

* * * *

श्रिया इति । हरेः हरति परिहरति स्वासंश्लिष्टान् करोति पाप्मन इति हरिः, अपहतपाप्मा इति श्रुतेः ; अनेन हेयप्रतिभटत्वमुक्तं भवति ।

End :

ननु मम सर्वविधबन्धुत्वेऽपि मत्प्राप्त्युपायाननुष्ठाने तव कथं मत्प्राप्तिसिद्धिरित्यत आह—सर्वमिति । त्वमेव नः अस्माकं सर्वमपि धर्म-मलौकिकश्रेयस्साधनं कर्मज्ञानभक्तिप्रपत्त्यादिकं भव। स्याद्धर्ममस्त्रियां पुण्य-मित्यमरः । सर्वधर्मस्थाने पुरुषकारतया त्वमेव स्थित्वा सिद्धोपायेन भगवता मदिष्टं प्रापयेत्याशयः । त्वयि गुणलेशाभावे कथं मम तथाभाव इत्यत आह स्वीकुर्विति । अकस्मात्कृपां निर्हेतुकदयां स्वीकुरु अङ्गी-कुरुष्व । मद्गुणलवानिरीक्षणे कृपानिर्हेतुकता न सिध्येदिति तदनपेक्षमेव मां रक्षेति भावः ॥

वाधूलधुर्यविबुधावलिवर्यचर्यरामानुजार्यकलितामृतकव्यभिख्यः।
श्रीवीरराघवगुरुर्विशदीचकार श्रीरङ्गराजरमणीगुणरत्नकोशम् ॥

No. **9764.** श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKŌŚAḤ WITH COMMENTARY.

Pages, 22. **Lines,** 8 on a page.

Begins on fol. 84*a* of the MS. described under No. 5224, wherein this work has been mentioned as Śrīstavavyākhyā in the list of other works given therein.

Breaks off in the seventh stanza.

Same work as the above.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥

हरेः, हरति परिहरति स्वासंश्लिष्टान् करोति पाप्मन इति भावः, अपहतपाप्मेति श्रुतेः । अनेन हेयप्रतिभटत्वमुक्तं भवति । हरत्याश्रितपापानीति वा हरिः, हरिर्हरति पापानीति स्मृतेः ।

End:

मधुरैः स्वादुभिः प्रियैश्च ; 'स्वादुप्रियौ तु मधुरौ' इत्यमरः । कटाक्षैरपाङ्गैः न त्वद्यापनैः । नः अस्माकं सूक्तिं शोभनां वाचं स्वस्तुतिम् । स्वयमेव अस्मत्प्रयत्नमनपेक्ष्यैव, अस्मत्प्रयत्नापेक्षणे शोभनत्वं न सिध्येदिति भावः । समग्रयतु समग्रां करोतु संपूर्णं ॥

No. 9765. श्रीगुणरत्नकोशव्याख्या.

SRIGUṆARATNAKŌŚAVYĀKHYĀ.

Pages, 92. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No. 5224, wherein this work has been mentioned as Śrīstutivyākhyā in the list of other works given therein.

Incomplete.

Similar to the above.

Beginning:

श्रीवत्साङ्कमिश्रैयः श्रीरङ्गराजाख्यैर्दैशिकोत्तमः अविद्याकृतसकलसांसारिकचेतनदुर्गतिं विचिन्त्य तद्गततया विद्रावितचित्तस्तदुज्जिजीवि-

(वयि)षया तेषां तत्परत्वज्ञापनाय दिव्यगुणान् प्रकाशयितुकामो वा तत्पदपङ्कजप्रेमप्रेरितान्तःकरणो भूत्वा वा श्रीरङ्गनायिकादिव्याज्ञानियमितो वा अस्येशाना जगतो विष्णुपत्नी, ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्, श्रद्धया देवोऽमृतत्वमश्नुते, श्रद्धा प्रतिष्ठा लोकस्य देवी, स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम्, इत्यादिश्रुतिस्मृतिप्रतिपादितदिव्यवैभवां

* * * *

श्रीशब्दवाच्यां श्रीरङ्गनायकीं स्तोतुमारभते। तत्रादौ प्रारिप्सितग्रन्थनिष्प्रत्यूहपरिसमाप्तये तत्प्रचयगमनाय च स्मृत्याचारासिद्धं मङ्गलमाचरन्त्याचार्याः--श्रियै इत्यादिना।

End:

एवं सकलवेदतात्पर्यमन्वर्थविवरणमन्त्ररत्नपूर्वोत्तरखण्डद्वयादिपदार्थं सुस्पष्टमनुसन्धाय तच्छेषतया तन्मनुशिष्टार्थं च प्रतिपाद्य सकलजगत्स्वामिन्याः श्रीरङ्गनायक्या वल्लभ एव शेषी, तदत्यन्तपरतन्त्रचेतनस्वरूपानुगुणोपायविशेषो निर्हेतुकदयैव तन्मुखोल्लास एव परमप्राप्यम्, अहंकार एव विरोधीति; प्राप्यस्य ब्रह्मणो रूपं प्राप्तु(श्च) प्रत्यगात्मनः। प्राप्त्युपायं(यः) फलं प्राप्तेः तथा प्राप्तिविरोधि च॥ वदन्ति सकला वेदाः सेतिहासपुराणकाः। मुनयश्च महात्मानः.

No. 9766. श्रीगुणरत्नकोशव्याख्या.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀ.

Substance, paper. Size, 11 × 8¼ inches. Pages, 57. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 19*a*. The other work herein is Mūlamantrajapacintāmaṇi 1*a*.

Complete.

Similar to the above. By Vēṅkaṭanivāsa, son of Rāmānujaguru and grandson of Śēṣacalārya.

Beginning:

श्रीरङ्गनायकि जगत्रयकल्पवल्लि स्वापाङ्गलेशसमुदञ्चितमङ्गलौघे ।
गम्भीरभावभवतीगुणरत्नकोशसंभावनोत्कमिह मां दययैव पश्य ॥
भावितभाष्यकारमततत्त्वसमस्तसुधीसेवितकूरनाथगुरुवर्यसुतप्रवरः ।
श्रीनिधिरङ्गराड्गुरुपराशरभट्टगुरुः श्रीगुणरत्नकोशमतनोन्मतिमन्महितः ॥

* * * *

शेषाचलार्यतनुजरामानुजगुरुजवेङ्कटनिवासः ।
प्रतिपादयति सुधीभ्यः श्रीगुणरत्नौघकोशगतमर्थम् ॥

इह खलु निखिलजगदधीश्वरीरमणश्रीरङ्गनाथेन समस्तजगन्निरुपाधिकजनन्याः श्रीरङ्गनायक्याः . . . च विशेषतस्तनयतया पुरोहिततया च विहितादरातिशयः श्रीपराशरभट्टार्यः स्वकीयमातृत्वप्रयुक्तप्रतिपत्तिविशेषपरिष्कृतचित्तः श्रियो दयावात्सल्यादिगुणमणीन् कस्मिंश्चित् स्तवे संग्रहीतुकामः श्रीगुणरत्नकोशाख्यप्रबन्धनिर्विघ्नपरिसमाप्त्यर्थं नमस्काररूपं मङ्गलमनुतिष्ठति—

श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥

हरेः भगवतः समस्तचिदचिद्विधानव्यसनं सकलचेतनाचेतननिर्माणप्रयासम् ।

End:

श्रीवैष्णवैः सह त्वदीयगुणानुभवसंपदं दत्वा परत्रापि युष्मत्पादारविन्दद्वन्द्वान्तरङ्गपरागतां प्रापयेत्यर्थः । पूर्वश्लोके विधितः कुतोऽपीत्युक्तमेव स्वीकुर्वकस्मात् कृपामिति विवृतम् ॥

Colophon:

इति श्रीगुणरत्नकोशव्याख्या शेषाचलार्यतनुजरामानुजगुरुजवेङ्कटनिवासविरचिता परिसमाप्ता ॥

No. 9767. श्रीपेरुंदेवीस्तोत्रम्.
ŚRĪPERUNDĒVĪSTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 22*b* of the MS. described under No. 9661.

Complete.

This consists of stanzas of praise and prayer addressed to Perundēvī worshipped as Goddess Lakṣmī in the shrine dedicated to Varadarāja at Conjeeveram.

Beginning:

श्रीकाञ्चीपुरहस्तिशैलनिलये श्रीदेवराजप्रिये
शीतांशुप्रतिमल्लसुन्दरमुखि श्रीराजराजेश्वरि ।
इष्टार्थं परिपूरयाब्जनिलये श्रीमत्पेरुंदेवि नः
कल्याणं कुरु सर्वदाननिरता कल्याणकोटिस्थिते ॥

End:

सानन्दं प्रतिशुक्रवारमपि या सायंदिने सुन्दरी
सर्वैश्वर्यमदातिरेकपिशुनस्वापाङ्गलीलारसा ।
मन्दस्मेरमुखी शनैरुपवनादायाति भर्तुर्गृहं
सा नः पूरयतादभीष्टमखिलं श्रीदेवराजप्रिया ॥

No. 9768. श्रीस्तवः.
ŚRĪSTAVAḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 28*a* of the MS. described under No. 5959.

Complete.

Same work as the one described under R. No. 173(*p*) of the Triennial Catalogue of MSS., Vol. I, Part I–A.

No. 9769. श्रीस्तवः.
ŚRĪSTAVAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 12*b* of the MS. described under No. 9662.

Complete.

Same work as the above.

No. 9770. श्रीस्तवः.

ŚRĪSTAVAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 9660.

Complete.

Same work as the above.

No. 9771. श्रीस्तवः.

ŚRĪSTAVAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9706.

Complete.

Same work as the above.

No. 9772. श्रीस्तवः.

ŚRĪSTAVAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 7016.

Complete.

Same work as the above, without colophon.

No. 9773. श्रीस्तवः.

ŚRĪSTAVAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 9774. श्रीस्तवः.
ŚRĪSTAVAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 9655.

Complete.

Same work as the above.

No. 9775. श्रीस्तवः.
ŚRĪSTAVAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 35*b* of the MS. described under No. 9745.

Complete.

Same work as the above, with the addition of one stanza in the beginning as given below :—

यो विष्णुरेव परतत्त्वमिति प्रतिज्ञां
प्रत्यर्थिसंसदि समर्थयते स्म सत्याम् ।
वेदान्तवाक्यगतिभिर्विविधैश्च तर्कैः
श्रीवत्सचिह्नगुरुमेनमुपाश्रयामः ॥

No. 9776. श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Pages, 3. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 3550.

Complete.

Same work as the one described under R. No. 160(*e*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, with the addition of the first stanza in the beginning and of the colophon in the end as given below :—

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीस्तुतिः संपूर्णा ॥

No. **9777.** श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 198*a* of the MS. described under No. 9001.

Complete.

Same work as the above.

No. **9778.** श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 9388.

Complete.

Same work as the above.

No **9779.** श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 75*b* of the MS. described under No. 9610.

Complete.

Same work as the above, with the addition of one stanza in the beginning as given below :—

Beginning :

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धनीम् ।
पद्मालंकृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥

No. 9780. श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 9729.

Complete.

Same work as the above.

No. 9781. श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 8. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 26*a*. The other works herein are Śrīraṅgarājastava 1*a*, Mukundamālā 20*a*.

Complete.

Same work as the above.

No. 9782. श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 14. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 98*a*. The other works herein are Divyadēśamaṅgalāśāsanapancaka 1*a*, Paramārthastuti 2*a*, Kāmāsikāṣṭaka 4*a*, Yathōktakāristōtra 5*a*, Adhikārasaṅgrahavyākhyā (Maṇipravāla) 7*a* Rahasyatrayasārādhikārārthasaṅgraha 62*a*.

Complete.

Same work as the above.

No. 9783. श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 9661.

Complete.

Same work as the above, without colophon.

No. 9784. श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 37*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 9785. श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9395.

Complete.

Same work as the above.

No. 9786. श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{3}{8}$ inches. Pages, 9. Lines, 14 on a page. Character, Telugu and Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Pañcaratnavyākhyā : Smaratattvaprakāśikā 7*a*.

Complete.

Same work as the above.

No. 9787. श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 8904.

Complete.

Same work as the above, without colophon.

No. **9788.** श्रीस्तुतिव्याख्या.

ŚRĪSTUTIVYĀKHYĀ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 69. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

This is a commentary on the Śrīstuti of Vēdāntadēśika by Ātrēya Varadārya.

Beginning:

आत्रेयं वरदाचार्यं श्रीनिवासार्यदेशिकम् ।
वेदान्तार्यं यतीन्द्रं च शठारिं च रमां क्षमाम् ॥
वासुदेवं कुलधनं भूवराहं प्रणम्य च ।
करिष्ये श्रीस्तुतिव्याख्यां बालानां बोधसिद्धये ॥

इह खलु सकलजगदुज्जीवनाय कलिविलसितकुमतिमतशतनिरसनाय च समुदितश्रीनिवासघण्टावतारतया प्रसिद्धः सर्वतन्त्रस्वतन्त्रो भगवान् वेदान्ताचार्यो भक्त्युपायानधिकारिणामुज्जीवनाय प्रपत्तिपथानुष्ठानं सप्रकाशं प्रबन्धान्तरेषु बहुशः प्रतिपाद्य तत्र पुरुषकारतया भगवता भाष्यकारेण गद्यादौ भगवन्नारायणेत्यादिना दर्शितां श्रीशरणागतिं मध्येगद्यं च असंख्येयकल्याणगुणगणश्रीवल्लभेत्यादिना गद्यान्ते च श्रीमन्नारायणेत्यनेन च सिद्धोपायकोटावनुप्रवेशेन च सूचितां श्रीविशिष्टशरणागतिं स्वयमपि विशदीकर्तुं लोकमातुर्विष्णुपत्न्या जीवत्वाणुत्वाद्यभ्युपगमेन निष्कर्षमिच्छतां पक्षान् विक्षोभयितुं पुरुषकारत्वशरण्यत्वोपायत्वौपयिकान् गुणांश्च प्रकटयितुं स्तुतिव्याजेन दिव्यप्रबन्धमारभते—मानातीतेत्यादि ।

End:

सा पूर्वोक्तकल्याणगुणाकरतया प्रसिद्धा एषा एवंविधदिव्यमङ्गलविग्रहा देवी सदा मे मह्यं संनिधत्तां संनिधानं करोतु इति प्रार्थना । मातुः संनिधाने हि प्रजायाः पुष्टिरिति भावः ॥

Colophon:

आत्रेयवरदार्येण कृतं श्रीस्तुतिव्याख्यानं संपूर्णम् ॥

No. 9789. श्रीस्तुतिव्याख्या.

ŚRĪSTUTIVYĀKHYĀ.

Pages, 53. Lines, 8 on a page.

Begins on fol. 1 1*a* of the MS. described under No. 5224.

Complete.

Same work as the above.

No. 9790. श्रीस्तुतिव्याख्या.

ŚRĪSTUTIVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 69. Lines, 6 on a page. Character, Grantha, Condition, slightly injured. Appearance, old.

Begins on fol. 31*a*. The other works herein are Nyāsatilaka-vyākhyā 1*a*, 66*a*, Nyāsadaśakavyākhyā 84*a*, Nyāsaviṁśativyākhyā 89*a*.

Complete.

Same work as the above.

No. 9791. सिद्धलक्ष्मीस्तोत्रम्.

SIDDHALAKṢMĪSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 195*b* of the MS. described under No. 119.

Complete.

In praise of the goddess Lakṣmī, as realised by Yōgins.

Beginning:

अस्य श्रीसिद्धलक्ष्मीस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, सिद्धलक्ष्मीः देवता, मम सिद्धलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओंकारे लक्ष्मिरूपे च विष्णोर्हृदयसंस्थिते ।
विष्णुमानन्दमानन्दे नादबिन्दुस्वरूपिणि ॥

*   *   *   *

बन्धूकपुष्पसंकाशे क्षीराब्धिकुलसुन्दरि ।
सोमसूर्याग्निमध्यस्थे व्योमातीतपरापरे ॥

End :

अकारे ब्रह्मरूपं च उकारे विष्णुमेव च ।
मकारे रुद्रमित्याहुः ओंकारः प्रणवात्मकः ॥
ओंकारं च त्रिकालं च तथा शक्तित्रयं विदुः ।
ओंकारं ध्यायते यस्तु सर्वपापैः प्रमुच्यते ॥

*   *   *   *

पञ्चमासं जपेत् स्तोत्रमष्टैश्वर्यं हि जायते ॥

Colophon :

इति सिद्धलक्ष्मीस्तोत्रं संपूर्णम् ॥

No. 9792. सीतादण्डकः.
SĪTĀDAṆḌAKAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 49*a* of the MS. described under No. 4470.

Complete.

A composition in Daṇḍaka metre in praise of Sītā who is the consort of Rāma and is considered to be an incarnation of Lakṣmī: by Varadaviṣṇu.

Beginning :

परिचरणपराणां पालनार्थं सुराणां
जनकसवनजाता जानकी लोकमाता ।
रतिसमुदयकान्ता राघवप्राणकान्ता
मयि चिर(कृततङ्गं)मङ्क्षु कुर्याद[ङ्क]पा(ङ्गम्) ॥

जय जनकनन्दिनि जय जगदेकजननि जय दयाजलनिधे जय दाशरथिप्रिये जय जय जगदम्ब धन्ये सदा भूमिकन्ये प्रजानामुदीते प्रमोदाय साते ।

End:

सीते धृतिं तन्वतीं मानसे ॥

इति तृतीयश्चरणः ॥

सरसतरपदकदम्बं सहृदयहृदयैकमोदभरजनकम् ।
दण्डकमेतं व्यतनोत्सीतामोदाय वरदविष्णुकविः ॥

Colophon:

इति सीतादण्डकं संपूर्णम् ॥

No. **9793.** सीताध्यानस्तोत्रम्.
SĪTĀDHYĀNASTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 32*b* of the MS. described under No. 9729.

Appears to be incomplete. A hymn in praise of Sītā.

Beginning:

सीतां विदेहतनयां रामस्य दयितानघाम् ।
हनूमता समाश्वस्तां भूमिजां शरणं भजे ॥

End:

सीतामुदारचरितां विधिशंभुविष्णुवन्द्यां त्रिलोकजननीं श्रितकल्पवल्लीम् ।
हैमैरनेकमणिमञ्जुलकान्तिभाग्भिर्भूषाभरैरनुदिनं ललितां नमामि ॥

No. **9794.** सीतास्तवः.
SĪTĀSTAVAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sītāstava with commentary 8*a*.

Complete.

Similar to the above. By Raṅgadāsa, son and disciple of Gōpālācārya of Ātrēyagōtra.

Beginning:

श्रियं त्रैलोक्यजननीं सुलभां चानपायिनीम् ।
विष्णोर्ब्रह्मादिसंपत्तेः प्रकृतिं तां नमाम्यहम् ॥
नासामौक्तिककान्तिभासितमुखी स्वातीगताब्जश्रियं
दृष्ट्वा हासयुता मदेभगमना नीलालका चारुवाक् ।
लक्ष्मीभोगिपुरीविलाससदना नक्षत्रमालावृता
कल्याणं मम वाञ्छितं सुहृदया शीघ्रं करोत्विन्दिरा ॥

*   *   *   *

अथादौ सापराधेष्वपि पुनः प्रपत्तिनिष्ठागरिष्ठेषु तव कृपास्तीत्याह—

काकासुरो महिसुते प्रथमापराधं कृत्वा नरोत्तमशराग्निविदग्धचेताः ।
लोकाननाथसहितानभिवीक्ष्य भीतो नीतस्त्वयैव हरिपादयुगं नु पुत्रः ॥

End:

गोपालार्यकटाक्षलेशभगवत्कैङ्कर्यराज्यस्थितः
श्रीलक्ष्मीपदपङ्कजातसुमरन्दास्वादतृप्तात्मकः ।
आत्रेयान्वयसंभवः सुहृदयो रङ्गाख्यदासः सदा
सीतायाः स्तवमुत्तमं जनमनःसन्तोषदं चाकरोत् ॥
सीतास्तवं रम्यतमं प्रभातेऽप्युत्थाय मर्त्याः परिशुद्धचित्ताः ।
ध्यायन्ति तेषां सकलेप्सितार्थान् श्रीरामपत्नी प्रददात्यजस्रम् ॥
नान्यं देवं तु पश्यामि त्वत्तो मद्रक्षणे परम् ।
तस्मात्पुत्रं च मां रक्ष देवि त्वत्पादसेविनम् ॥ ३९ ॥

Colophon:

इत्यात्रेयकुलकलशाम्बुधिसुधाकरश्रीगोपालाचार्यसूनुना लक्ष्मीकटाक्षसंधुक्षितबुद्धिविभवेन रङ्गदासेन विरचितः सीतास्तवः समाप्तः ॥

No. **9795.** सीतास्तवः—सव्याख्यः.

SĪTĀSTAVAḤ WITH COMMENTARY.

Pages, 66. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 9794.

Complete.

Same work as the above, with a commentary by the same author.

Beginning :

श्रियं त्रैलोक्यजननीं सुलभां चानपायिनीम् ।
विष्णोर्ब्रह्मादिसंपत्तेः प्रकृतिं तां नमाम्यहम् ॥ १ ॥

श्रीसीतास्तवमिति स्वचिकीर्षितग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय च स्वेष्टदेवतां नमस्करोति—श्रियमिति । अत्रादौ श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धेरभ्युच्चयः । तदुक्तम्—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥

इति । त्रैलोक्यजननीं त्रयो लोकास्त्रैलोक्यम्; चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तस्य लोकत्रयवर्तमानजङ्गमस्थावरात्मकप्राणिसमूहस्य जननीं मातरम् । लक्ष्म्याः जगन्मातृत्वं जगत्कारणत्वं च श्रुतिस्मृतिपुराणेषु प्रतिपादितम् । तथाच—अस्येशाना जगतो विष्णुपत्नीति श्रुतिः ।

End :

नान्यं देवं तु पश्यामि त्वत्तो मद्रक्षणे परम् ।
तस्मात्पुत्रं च मां रक्ष देवि त्वत्पादसेविनम् ॥ ३९ ॥

स्पष्टोऽर्थः ॥

Colophon :

इत्यात्रेयकुलकलशाम्बुधिसुधाकरगोपालगुरुकटाक्षप्रसादनिवारिताविद्यापटलेन श्रीमहालक्ष्मीप्रसादसमासादितबुद्धिविभवेन रङ्गदासेन विरचिता सीतास्तवव्याख्या समाप्ता ॥

(19) VALLABHĀCĀRYA.

No. 9796. आचार्यस्तोत्रम्.
ĀCĀRYASTŌTRAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 93*b* of the MS. described under No. 2981.

Complete.

In praise of the greatness of his preceptor Vallabhācārya: by Haridāsa.

Beginning:

तरेयुः संसारं कथमगतपारं सुरजनाः
कथं भावात्मानं हरिमनुहरेयुश्च सहसा ।
कथं वा माहात्म्यं निजहृदि नयेयुर्व्रजभुवां
भवेदाविर्भावो यदि न भुवि वागीश भवतः ॥ । ॥ १ ॥
श्रयेयुः सन्मार्गं कथमनुभवेयुः सुखभरं
कथं वा सर्वस्वं निजमहह कुर्युश्च सफलम् ।
त्यजेयुः कर्मादेः फलमपि कथं दुःखसहितं
भवेदाविर्भावो यदि न भुवि वागीश भवतः ॥ २ ॥

End:

जयेयुर्दुर्जेयानपिमनु(ज)जातानपि कथं
कथं वा मार्गीयं फलमुपदिशेयुश्च परमम् ।
कथं वा गच्छेयुः शरणमिति भावेन सततं
भवेदाविर्भावो यदि न भुवि वागीश भवतः ॥ ८ ॥

Colophon:

श्रीहरिदासोक्तं निजाचार्यस्तोत्रं संपूर्णम् ॥

No. 9797. दासभावाष्टकम्.
DĀSABHĀVĀṢṬAKAM.

Pages, 3. Lines, 26 on a page.

Begins on fol. 96*a* of the MS. described under No. 2981.

Complete.

Eight stanzas indicating the supplicant's homage and veneration towards the disciples and devotees of Śrī-Vallabhācārya; by Haridāsa

Beginning:

ये नित्यं परिभावयन्ति चरणौ श्रीवल्लभस्वामिनो
ये वा तद्गुणगानसेवनपरा ये संनिधिस्थायिनः ।
ये वा तद्गतभावभावितमनोमोदान्विता आसते
तेषामेव सदास्तु दास्यममरं किं वा फलं जन्मनः ॥ १ ॥

End:

ये तद्रूपमहर्निशं स्वहृदये तापात्मकं सुन्दरं
साकारं सरसात्मकं सततया ख्यातं च जाते भुवि ।
नित्यं तत्परिचिन्तयन्ति सततं संकीर्तयन्त्यादरात्
तेषां दैन्यभरेण मे प्रतिभवं दास्यं हि भूयात्फलम् ॥ ८ ॥

Colophon:

इति श्रीहरिदासविरचितं दासभावाष्टकं संपूर्णम् ॥

No. 9798. देह्यष्टकम्.
DĒHYAṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 103*b* of the MS. described under No. 2981, wherein this work has been mentioned as Dainyāṣṭaka in the list of other works given therein.

Complete.

Eight stanzas imploring Vallabha, considered as an incarnation of the fire in the mouth of Śrī-Kṛṣṇa, to show his real form: by Haridāsa.

Beginning:

हाहा श्रीवल्लभाधीश हाहा कृष्णमुखाम्बुज ।
हाहा वियोगभावाग्ने देहि मे निजदर्शनम् ॥ १ ॥

End:

हाहा विजितकन्दर्प हाहा स्वानन्दतुन्दिल ।
हाहा हरिविहारात्मन् देहि मे निजदर्शनम् ॥ ८ ॥

Colophon:

इति श्रीहरिदासकृतं दैन्या(देह्य)ष्टकं संपूर्णम् ॥

No. 9799. पञ्चाक्षरस्तोत्रम्.
PAÑCĀKṢARASTŌTRAM.

Page, 1. Lines, 26 on a page.

Begins on fol. 93*a* of the MS. described under No. 2981.

Complete.

In praise of Vallabhācārya. It is not apparent from the Stōtra why it should be named Pancākṣarastōtra. By Haridāsa.

Beginning:

श्रीवल्लवीवल्लभास्यवियोगाग्ने कृपाकर ।
अलौकिकनिजानन्द श्रीवल्लभ तवास्म्यहम् ॥ १ ॥
कृष्णाधरसुधाभारभरितावयवावृत ।
श्रीभागवतभावाब्धे श्रीवल्लभ तवास्म्यहम् ॥ २ ॥

End:

अशेषहरिदासैकसेवितस्वपदाम्बुज ।
अदेयफलदानार्थ श्रीवल्लभ तवास्म्यहम् ॥ ८ ॥

Colophon:

इति श्रीहरिदासोक्तं पञ्चाक्षरस्तोत्रं संपूर्णम् ॥

No. 9800. मङ्गलाष्टकम्.
MAṄGALĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 95*b* of the MS. described under No. 2981.

Complete.

Eight stanzas in praise of Vallabhācārya who is considered by his followers to be an incarnation of the fire in the mouth of Hari or Viṣṇu: by Haridāsa.

अतः श्रीकृष्णविरहस्त्रीभावाग्निः प्रभुर्मतः ।
तत्स्वरूपं यथा कृष्णस्तथैवेति विभाष्य(व्य)ताम् ॥

* * * *

कृष्णत्वेनैव तद्ध्यानं स्त्रीभावात्मतया त्वतः ॥

End:

सोऽस्मत्पतिः सदा श्रीमद्वल्लभाख्यो विचिन्त्यताम् ।
स्वतन्त्रभक्तिसंबन्धं साक्षात्कारयतु स्वयम् ॥

* * * *

एवंविधः सदा श्रीमदाचार्यश्चिन्त्यतां हृदि ॥ २२ ॥

Colophon:

इति श्रीहरिदासोक्तं(क्त)निजाचार्यचिन्तनप्रकारः संपूर्णः ॥

No. 9804. वल्लभाष्टकम्.
VALLABHĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 92*b* of the MS. described under No. 2981, wherein this work has been mentioned as Nijācāryāṣṭaka in the list of other works given therein.

Complete.

Eight stanzas in praise of his preceptor, Vallabhācārya: by Haridāsa.

Beginning:

श्रीवल्लवीवल्लभभावभाविसंतापभावात्मक एव योऽग्निः ।
प्रादुर्भवद्भक्तिसुधासमुद्रमुद्भासयन् सोऽस्तु सदारणं मे ॥ १ ॥
न यस्य कुत्रापि च धर्मयुक्तता रहस्यतद्भावनभावनाक्षमः ।
सदैव लीलालयलीननित्यविक्षेपयुक्तः शरणं सदा मे ॥ २ ॥

End:

स्वचरणकमलं फलं सदा मे सपदि ददातु कृपाविशेषयुक्तः ।
. . . . विहिताघसञ्चयहर्ता हरतु र(ति)प्रतिबन्धकं हरिर्नः ॥ ८ ॥

Colophon:

इति श्रीहरिदासोक्तं निजाचार्याष्टकं संपूर्णम् ॥

No. 9805. वल्लभाष्टकम्.
VALLABHĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 104*a* of the MS. described under No. 2981.

Complete.

Eight stanzas in praise of Vallabhācārya who is here spoken of as no other than Lord Kṛṣṇa : by Viṭṭhalēśvara.

Beginning:

श्रीमद्वृन्दावनेन्दुप्रकटितरसिकानन्दसंदोहरूप-
स्फूर्जन्मासादिलीलामृतजलधिभराक्रान्तसर्वोऽपि शश्वत् ।
तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासी-
द्भूमौ यः सन्मनुष्याकृतिरतिकरुणस्तं प्रपद्ये हुताशम् ॥ १ ॥

End:

अज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्या-
मग्नित्वं वर्णितं ते कविभिरिह सदा वस्तुतः कृष्ण एव ।
प्रादुर्भूतो भवानित्यनुभवनिगमाद्युक्तमानैरवेत्य
त्वां श्रीश्रीवल्लभेमे निखिलबुधजना गोकुलेशं भजन्ते ॥ ८ ॥

Colophon:

इति श्रीविट्ठलेश्वरविरचितं वल्लभाष्टकं संपूर्णम् ॥

No. 9806. विट्ठलेशाष्टकम्.
VIṬṬHALĒŚĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 90*b* of the MS. described under No. 2981.

Complete.

Eight stanzas in praise of Viṭṭhalēśa, son of Vallabhācārya : by Haridāsa.

Beginning:

क्षितावाविर्भूतो जनकजनसंपालनकृते
कृपापूर्णः कर्तुं भजनपथविस्तारमतुलम् ।
स्मरस्मेराकारः सहजविपुलारक्तनयनः
स मे नित्यं नाथो वसतु हृदये विट्ठलविभुः ॥ १ ॥

End:

इति श्रीमत्स्वामिस्मरणरतिमात्रैकसधनः
स्फुटं प्रावोचद्वै निजजनपतेरष्टकमिदम् ।
पठत्येवंभावः प्रचुरसद(रस)भावोऽपि सततं
परं द्वन्द्वे भावं सपदि लभते विट्ठलविभुः ॥ ९ ॥

Colophon:

इति श्रीहरिदासविरचितं विट्ठलेशाष्टकं संपूर्णम् ॥

No. **9807.** विट्ठलेश्वरचिन्तनम्.

VIṬṬHALĒŚVARACINTANAM.

Pages, 3. Lines, 26 on a page.

Begins on fol. 91*a* of the MS. described under No. 2981.

Complete.

Stanzas explaining the mode of contemplation of Viṭṭhalēśvara.

Beginning:

अथ श्रीविट्ठलाधीशस्वामिरूपं निरूप्यते ।
विविधस्वामिनीभावस्त्रीभावविरह पुनः ॥ १ ॥
श्रीकृष्णभावसङ्गोऽपि विपरीतरसे तथा ।
भावद्वयात्मिका तत्र पुष्टिमार्गप्रसिद्धये ॥
श्रीकृष्णः स्यात्स्वतः प्रादुर्भूतस्त्रीभावरूपतः ।
आविर्भावेऽपि सहजकस्तूरीतिलकान्वितः ॥

End:

सदा मदीयहृदये वसतु स्वकृपाबलात् ।
सर्वदोषाश्रये स्वीयेऽप्येतद्रूपचतुष्टयम् ॥ १० ॥

Colophon:

इति श्रीविट्ठलेश्वरचिन्तनप्रकारः संपूर्णः ॥

No. **9808.** सर्वोत्तमस्तोत्रम्.
SARVŌTTAMASTŌTRAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 92*a* of the MS. described under No. 2981.

Complete.

In praise of Vallabhācārya who is here spoken of as the son of Fire.

Beginning:

यः कृष्णसेवाब्धिमगाधबोधं जगाद शास्त्रं भगवत्प्रणीतम् ।
निश्चित्य तद्भावमनन्यभावं तं वह्निसूनुं शरणं प्रपद्ये ॥ १ ॥

End:

यो धर्मरक्षार्थमतिप्रवृद्धो यज्ञैः समीजे जनकं कृशानुम् ।
. . . . तं वह्निसूनुं शरणं प्रपद्ये ॥ ७ ॥

Colophon:

इति सर्वोत्तमस्तोत्रं (संपूर्णम्) ॥

No. **9809.** स्वामियुगलाष्टकम्.
SVĀMIYUGALĀṢṬAKAM.

Page, 1. Lines, 26 on a page.

Begins on fol. 97*a* of the MS. described under No. 2981, wherein this work is omitted to be mentioned in the list of other works given therein.

Complete.

Seven stanzas in praise of Vallabha and Viṭṭhala: by Haridāsa.

Beginning:

आसातामेकशरणे विहिताकरणे हृदि ।
स्वामिनौ वल्लभाधीशविट्ठलेशाभिधौ सदा ॥ १ ॥

End:

मन्मूर्धनि विराजेतां प्रभू लोकविलक्षणौ ।
स्वामिनौ वल्लभाधीशविट्ठलेशाभिधौ सदा ॥ ७ ॥

Colophon:

इति श्रीहरिदासोक्तं स्वामियुगलाष्टकं संपूर्णम् ॥

---

(20) VĀYU OR THE GOD OF WIND.

No. 9810. वायुस्तोत्रम्.
VĀYUSTŌTRAM.

Pages, 21. Lines, 5 on a page.

Begins on fol. 71*b* of the MS. described under No. 1872 ane not on fol. 71*a* as stated therein.

Complete.

In praise of Vāyu, the god of wind, and his incarnations, viz., Hanumat, Bhīma and Ānandatīrtha: by Trivikramācārya, son of Subrahmaṇyasūri.

Beginning:

पान्त्वस्मान्पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटा-
कुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कण्ठीरवास्यप्रततसुनखरादारिताराद्दूर-
प्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता नाकिबृन्दैः ॥

* * * *

श्रीमद्विष्ण्वङ्घ्रिनिष्ठातिगुणगुरुतमश्रीमदानन्दतीर्थ-
त्रैलोक्याचार्यपादोज्ज्वलजलजलसत्पांसवोऽस्मान्पुनन्तु ।
वाचां यत्र प्रणेत्री त्रिभुवनमहिता शारदा शारदेन्दु-
ज्योत्स्ना भद्रस्मितश्रीधवलितककुभा प्रेमभारं बभार ॥

End:

सुब्रह्मण्याख्यसूरेः सुत इति सुभृशं केशवानन्दतीर्थ-
श्रीमत्पादाब्जभक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य ।

तत्पादार्चादरेण ग्रथितपदलसन्मालया त्वेतया ये
संराध्यामू नमन्ति प्रततमतिगुणा मुक्तिमेते व्रजन्ति ॥
कल्याणाभ्युदयार्काय कामितार्थप्रदायिने ।
श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः ॥

Colophon:

इति श्रीत्रिविक्रमाचार्यविरचितश्रीमद्वायु[स्तुति]स्तोत्रं संपूर्णम् ॥

No. **9811.** वायुस्तोत्रम्.

VĀYUSTŌTRAM.

Substance, palm-leaf. Size, 7 × 1⅛ inches. Pages, 44. Lines, 4 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Dvādaśastōtra 23*a*.

Wants beginning; otherwise complete.

Same work as the above.

No. **9812.** वायुस्तोत्रम्.

VĀYUSTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 142*a* of the MS described under No. 2702, wherein this work has been mentioned as Viṣṇustōtra in the list of other works given therein.

Breaks off in the sixteenth stanza.

Same work as the above.

No. **9813.** वायुस्तोत्रम्—सव्याख्यानम्.

VĀYUSTŌTRAM WITH COMMENTARY.

Pages, 52. Lines, 8 on a page.

Begins on fol. 180*a* of the MS. described under No. 881, wherein this work has been mentioned as Vāyustutivyākhyāna in the list of other works given therein.

Almost complete.

The same as the above, but together with a commentary.

Beginning :

पूर्णबोधान् गुरून् नत्वा पान्त्वस्मानिति मन्त्रयोः ।
बालबोधाय सद्याख्यां वयं कुर्मो यथामति ॥

पान्त्वस्मान्पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटा-

* * * *

पान्त्विति । पुरुहूतस्येन्द्रस्य वैरिणः शत्रवः दैत्या बलमेषामस्तीति बलवन्तः ते च ते मातङ्गा गजाः वैरिणश्च बलवन्मातङ्गाः ।

End :

सुतरामत्यर्थं केशवः श्री(ना)रायणः आनन्दतीर्थश्च तयोः श्रीमत्पादाब्जभक्तः श्रीमच्चरणनलिनसेवकः त्रिविक्रमाचार्यः हरेः श्रीवासुदेवस्य.

No. **9814.** वायुस्तोत्रव्याख्यानम्.
VĀYUSTŌTRAVYĀKHYĀNAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 46. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work sherein are Brahmasūtrabhāṣyaṭīkā : Tattvaprakāśikā 24*a*, Tattvamañjarī 60*a*.

Incomplete.

Another commentary on the Vāyustōtra : by Śēsa, a disciple of Chalāri Narasiṁhārya.

Beginning :

लक्ष्मीनारायणं देवं व्यासमध्वजयादिकान् ।
गुरून्मूलादिपरमान् वन्दे विद्यागुरूंश्च मे ॥
छलारिनारसिंहार्यशिष्यः शेषाभिधो बुधः ।
श्रीमद्वायुस्तुतेष्टीकां कुरुते मन्दबोधिनीम् ॥

अथ सकलकविकुलतिलकः श्रीमदाचार्यपूर्णानुग्रहपात्रः परमास्तिकशिरोमणिस्त्रिविक्रमपण्डिताचार्यवर्यः शिष्टवस्तुसंकीर्तनरूपं मङ्गलं कुर्वन्नेव

साधूनुद्दिधीर्षुः मूलरूपस्य वायोस्तदवताराणां च स्तुतिं विधत्ते—श्रीमद्विष्ण्वङ्घ्रिनिष्ठेत्यादिना । तत्रादौ तावत् श्रीमदाचार्यपादपांसून् प्रार्थयते श्रीमद्विष्ण्वङ्घ्रिनिष्ठेति श्लोकद्वयेन । श्रीमद्विष्ण्वङ्घ्रिनिष्ठेत्यारभ्य पांसव इत्यन्तमेकं पदम् । श्रीः लक्ष्मीः अस्यास्तीति श्रीमान्; 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः ।

End:

माधवस्य, माया इन्दिराया(धवः पतिः) 'धवः पतिः प्रियो भर्ता' इत्यमरः । तस्य लक्ष्मीपतेः पद्युगले एकां प्रधानां भक्तिं प्रदिश देहि । अथ अनन्तरं भगवतो वायोः मुख्यप्राणस्य.

No. **9815.** वायुस्तोत्रव्याख्यानम्

VĀYUSTŌTRAVYĀKHYĀNAM.

Substance, palm-leaf. Size, 14 × $1\frac{5}{8}$, $12\frac{1}{2}$ × $1\frac{3}{4}$ inches. Pages, 73. Lines, 7 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Lakṣmīhṛdaya 38*a*, Nārāyaṇahṛdaya 44*a*.

Complete.

Another commentary on the Vāyustōtra of Trivikramācārya: by Viśvapatitīrtha.

Beginning:

आचार्यः नरसिंहनखेभ्यः स्वस्य संरक्षणं प्रार्थयते—पान्त्विति । पुरुहूतस्य देवेन्द्रस्य . . . .

त एव बलवन्मातङ्गमाद्यन्तः बलवन्तश्च ते माद्यन्तः मदोपेताश्च ते मातङ्गाश्चेति विग्रहः ।

End:

नमन्ति नमस्कारं कुर्वन्ति । एते जनाः । मतिः अपरोक्षज्ञानं सा च गुणाः भक्त्यादिगुणाः ते च मतिगुणाः प्रतीताः अतिविशदाः मतिगुणा येषां ते तथा सन्तः मुक्तिं मोक्षं व्रजन्ति; व्रज गतौ लट् ॥

Colophon:

इति विश्वपतितीर्थ(कृत)वायुस्तुतिटीकासंग्रहः समाप्तः ॥

---

(21) VIṢṆU.

No. **9816.** अच्युतशतकम्—छायासहितम्.

ACYUTAŚATAKAM WITH CHĀYĀ

Pages, 26. Lines, 8 on a page.

Begins on fol. 8*a* of the MS. described under No. 2510.

Complete.

Same work as the one described under R. No. 366(*g*) of the Triennial Catalogue of MSS., Vol. I, Part I-B.

No. **9817.** अच्युतशतकम्—छायासहितम्.

ACYUTAŚATAKAM WITH CHĀYĀ.

Pages, 35. Lines, 6 on a page.

Begins on fol. 97*b* of the MS. described under No. 9388.

Almost complete.

Same work as the above.

No **9818.** अच्युतशतकम्—छायासहितम्.

ACYUTAŚATAKAM WITH CHĀYĀ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 284*b* of the MS. described under No. 9001.

Contains the first five stanzas only.

Same work as the above.

No **9819.** अञ्जनशैलनाथस्तोत्रम्.

AÑJANAŚAILANĀTHASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 9702.

Complete.

In praise of God Śrīnivāsa as worshipped in the sacred shrine on the Tirupati hills.

Beginning:

पुलकिनि भुजमध्ये पूजयन्तं पुरन्ध्रीं भुवननयनपुण्यं पूरिताशेषकामम् ।
पुनरपि वृषशैले फुल्ल(नीलो)त्पलाभं पुरुषमनुभवेयं पुण्डरीकायताक्षम् ॥
आजानसौहृदमपारकृपामृताब्धिमव्याजवत्सलमवेलसुशीलिमाद्यम् ।
आनन्द . . . मयावरोधमाराधयामि हरिमञ्जनशैलनाथम् ॥

End:

अर्धेन्दुभास्वदलिकोल्लसदूर्ध्वपुण्ड्रमालोक(ल)नीलकुटिलालकचारुवक्त्रम् ।
आविर्मयूखमणिचूडमहःकिरीटमाराधयामि हरिमञ्जनशैलनाथम् ॥

No. 9820. अतिमानुषस्तवः.
ATIMĀNUṢASTAVAḤ.

Pages, 19. Lines, 4 on a page.

Begins on fol. 31*a* of the MS. described under No. 5777.

Complete.

In praise of God Viṣṇu worshipped under the name of Raṅganātha in the sacred shrine at Srirangam: by Śrīvatsāṅkamiśra of Haritagōtra. He is called by the name of Kūrattāḻvār in Tamil.

Beginning:

अतिमानुषशीलवृत्तवेषैरतिरिक्तामरविक्रमप्रतापैः ।
अतिलङ्घितसर्वलोकसाम्यं वरये वैष्णववैभवावतारम् ॥ १ ॥
श्रेयः किरन्तु किरणाश्ररणारविन्दनिष्यन्दमानमकरन्दरसौघदेश्याः ।
तज्ज्ञः श्रुतेर्मधुन उत्स इति प्रतीता मङ्गल्यरङ्गनिलयस्य परस्य धाम्नः ॥
श्रीमत्पराङ्कुशमुनीन्द्रमनोनिवासात्तज्ज्ञानुरागरसमज्जनमञ्जसाप्य ।
अद्याप्यनारततदुत्थितरागयोगं श्रीरङ्गराजचरणाम्बुजमाश्रयामः ॥

End:

पापीयसोऽपि शरणागतिशब्दभाजो नोपेक्षणं मम तवोचितमीश्वरस्य ।
विज्ञानशक्तिकरुणासु सतीषु नेह पापं पराक्रमितुमर्हति मामकीनम् ॥६१॥

Colophon:

इति अतिमानुषस्तवः संपूर्णः ॥

No. 9821. अतिमानुषस्तवः.
ATIMĀNUṢASTAVAḤ.

Pages, 14. Lines, 24 on a page.

Begins on fol. 41*a* of the MS. described under No. 5959.

Complete.

Same work as the above, with full colophon.

Colophon:

इति श्रिहरि(त)कुलतिलकश्रीवत्सचिह्नविरचितः अतिमानुषस्तवः संपूर्णः॥

No. 9822. अतिमानुषस्तवः.
ATIMĀNUṢASTAVAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 9754

Complete.

Same work as the above.

No. 9823. अतिमानुषस्तवः.
ATIMĀNUṢASTAVAḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 39*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 9824. अतिमानुषस्तवः.
ATIMĀNUṢASTAVAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 9389, wherein this work has been mentioned as Śriraṅgarājastava in the list of other works given therein.

Incomplete.

Same work as the above.

No. 9825. अतिमानुषस्तवः—सव्याख्यः.

ATIMĀNUṢASTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 34. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 34*a*. The other works herein are Varadarājastava 1*a*, Sundarabāhustava 6*a*, Sundarabāhustava with commentary 9*a*.

Complete.

Same work as the above, but with the commentary of Rāmānujācārya, a disciple of Vēṅkaṭācārya.

Beginning:

अतिमानुषशीलवृत्तवेषैः

* * * *

सदाचार्यसमाश्रयणेन प्राप्तपरावरतत्त्वयाथात्म्यविवेकः श्रीवत्साङ्कमिश्रः परव्यूहविभवार्चारूपेणावस्थितं स्तव्यं स्तवप्रियमीश्वरं स्तोतुकामस्तत्र रामकृष्णादिविभवावतारं देवतिर्यङ्मनुष्यसाधर्म्येण पश्यतां प्रत्यवायं परत्त्ववेषेण पश्यतामभ्युदयं च

* * * *

स्वयमतिमानुषैर्लिङ्गैः परतत्त्ववेषेण प्रतिपादयिष्यन् वैभवावतारं स्तोष्यन् तत्प्रकाशनेन स्वात्मानमुपसंपन्नान् शिष्यानप्यनुग्रहीष्यन् प्रथममर्चावतारं श्रीरङ्गनाथमभिष्टौति—श्रेयः किरन्त्विति । तज्जाः चरणारविन्दजाः किरणाः श्रेयः परमपुरुषार्थं किरन्तु विकिरन्तु दद्युरित्यर्थः ।

End:

इतः परं मामकीनं शरणागतितत्प्राप्तिविरोधिभावपापं रक्षणोपयुक्तासु त्वज्ज्ञानशक्तिकरुणासु नित्यं सतीषु ताः परिक्रमितुमतिलङ्घ्य पुनरपि संसारे प्रवर्तयिति(तुं) नार्हति । शरणव्रजनपर्यन्त एव पाप(प)राक्रमि-(म इ)ति भावः ॥

[सु]वेङ्काटचार्यशिष्येण रामानुजविपाश्रिता ।
अतिमानुषसंज्ञायाः स्तुतेर्व्याख्या विनिर्मिता ॥

Colophon:

इति श्रीमद्रामानुजाचार्यविरचितमतिमानुषस्तोत्रव्याख्यानं संपूर्णम् ॥

No. 9826. अतिमानुषस्तवः—सव्याख्यः.

ATIMĀNUṢASTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 16. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 69*a*. The other works herein are Ācāryacampū 1*a*, Ācāryapañcāśat 57*a*, Varadarājastava 63*a*, Varadarājapañcāśat 77*a*.

Breaks off in the twenty-second stanza.

Same work as the above

No. 9827. अभीतिस्तवः.

ABHĪTISTAVAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 8904.

Complete.

A hymn of praise said to have been composed by Vēdāntadēśika with a view to dispel the alarm caused amongst the Śrī-Vaiṣṇava community when Śrīraṅgam was sacked by the Muhammadans. It is in praise of God Raṅganātha, and its due repetition is held to be efficacious in removing fear of any kind.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . संनिधत्तां सुदा हृदि ॥
अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाभयविधायिनो जगति यन्निदेशे स्थिताः ।
तदेतदतिलङ्घितद्रुहिणशम्भुशक्रादिकं
रमासखमधीमहे किमपि रङ्गधुर्यं महः ॥ १ ॥

दयाशिशिरिताशया मनसि मे सदा जागृयुः
श्रियाध्युषितवक्षसः श्रितमरुद्वृधासैकताः ।
जगद्दुरितघस्मरा जलधिडिम्भडम्भस्पृशः
सकृत्प्रणतरक्षणप्रथितसंविदः संविदः ॥ २ ॥

End :

यतिप्रवरभारतीरसभरेण नीतं वयः
प्रफुल्लपलितं शिरः परमिह क्षमं प्रार्थये ।
निरस्तरिपुसंभवे क्वचन रङ्गमुख्ये विभो
परस्परहितैषिणां परिसरेषु मां वर्तय ॥ २८ ॥
प्रबुद्धगुणवीक्षणप्रथितवेङ्कटेशोद्भवा-
मिमामभयसिद्धये पठत रङ्गभर्तुः स्तुतिम् ।
भयं त्यजत भद्रमित्यभिदधत्स वः केशवः
स्वयं घनघृणानिधिर्गुणगणेन गोपायति ॥ २९ ॥
कवितार्किकसिंहाय . . वेदान्तगुरवे नमः ॥

No. **9828.** अभीतिस्तवः.

ABHĪTISTAVAḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 76*b* of the MS. described under No. 5922, wherein this work is stated to begin on fol. 76*a* in the list of other works given therein.

Complete.

Same work as the above.

No **9829**. अभीतिस्तवः.

ABHĪTISTAVAḤ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 96*a* of the MS. described under No. 5959.

Complete.

Same work as the above, but with colophon.

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु अभीतिस्तवः संपूर्णः ॥

No. 9830. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 44*b* of the MS. described under No. 9388.

Complete.

Same work as the above.

No. 9831. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 5777.

Complete.

Same work as the above.

No. 9832. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 69*a* of the MS. described under No. 9610.

Complete.

Same work as the above.

No. 9833. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 9012.

Complete.

Same work as the above.

No. 9834. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 23*a* of the MS. described under No. 2043.

Wants eleven stanzas in the beginning; otherwise complete.

Same work as the above.

No. 9835. अभीतिस्तवः.
ABHĪTISTAVAḤ.

Page, 1. Lines, 12 on a page.

Begins on fol. 24*a* of the MS. described under No. 3550.

Contains the first eight stanzas only.

Same work as the above.

No. 9836. अभीतिस्तवः—सव्याख्यः.
ABHĪTISTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16¼ × 1 inches. Pages, 63. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

The same work as the above, but together with a commentary. By Gārgya Vēṅkaṭācārya, a disciple of Vātsya Dayēśārya.

Beginning :

वेदान्ताचार्यवर्येण वेदान्तार्थाभिधायिनी ।
कृताभीतिस्तुतिः कृत्स्नजगद्भीतिनिवारिणी ॥
श्रीदयेशार्यपादस्य श्रीपादाम्बुजरेणुना ।
गार्ग्यश्रीवेङ्कटार्येण व्याख्या तस्या विलिख्यते ॥

आदौ मङ्गलमाचरति—अभीतिरिति ।

अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाभयविधायिनो जगति यन्निदेशे स्थिताः ।
तदेतदतिलङ्घितद्रुहिणशम्भुशक्रादिकं
रमासखमधीमहे किमपि रङ्गधुर्यं महः ॥

यज्जुषां भजनादिना यस्य भगवतः प्रियाणाम्; 'यमेवैष वृणुते तेन लभ्यः,' 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।' इति श्रुतिस्मृतीरितानामभीतिः भवतीति शेषः। अभीतिशब्देन संसारनिवृत्तिरूपा लक्ष्यते, अथ सोऽभयं गतो भवतीति श्रुतेः।

End:

कथं स्तोत्रपाठमात्रेण मुक्तिरिति चेत्तत्राह—भयमिति। 'भयं त्यजत भद्रं वः' इति पाण्डवेभ्योऽभिदधत् घनघृणानिधिः बहुलदयापरिपूर्णः सः तादृशः आश्रितरक्षणैकनिरतः केशवः गुणगणेन युक्त इत्यध्याहार्यः। वः युष्मान् गोपायति संरक्षतीति स्तोत्रपाठेन तुष्टः श्रीकृष्णः संरक्षतीति तात्पर्यम्॥

व्याख्या वात्स्यदयेशार्यवीक्षासंधुक्षितात्मना।
कृताभीतिस्तुतेर्गार्ग्यवेङ्कटार्यविपश्चिता॥
कवितार्किकसिंहाय . . वेदान्तगुरवे नमः॥

Colophon:

अभीतिस्तुतिव्याख्या संपूर्णा॥

No. **9837.** अभीतिस्तवः—सव्याख्यः.

ABHĪTISTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅛ × 1⅝ inches. Pages, 41. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 24*a* of the MS. described under No. 206, wherein this work has been mentioned as Maṅgalahāratiślōka in the list of other works given therein.

Complete.

Same work as the above, but without colophon.

No. 10245. रङ्गनाथादिमङ्गलाशासनम्.
RAṄGANĀTHĀDIMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 12 on a page.

Begins on fol. 51*b* of the MS. described under No. 206, wherein this work has been mentioned as Maṅgalahārati in the list of other works given therein.

Complete.

Same work as the above.

No. 10246. रङ्गनाथाष्टकम्.
RAṄGANĀTHĀṢṬAKAM.

Page, 1 Lines, 24 on a page.

Begins on fol. 116*a* of the MS. described under No. 5959.

Complete.

Eight stanzas in praise of God Raṅganātha.

Beginning:

पद्माधिराजे गरुडाधिराजे विरिञ्चिराजे सुरराजराजे ।
त्रैलोक्यराजेऽखिलराजराजे श्रीरङ्गराजे रमतां मनो मे ॥

End:

प्रमोदनिद्रे जगदेकनिद्रे विरिञ्चिनिद्रे च सुमुद्रानिद्रे ।
श्रीयोगनिद्रे फणिभोगनिद्रे श्रीरङ्गनिद्रे रमतां मनो मे ॥
रङ्गाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

No. 10247. रङ्गनाथाष्टकम्.
RAṄGANĀTHĀṢṬAKAM.

Pages, 2. Lines, 6 on a page

Begins on fol. 57*a* of the MS. described under No. 9706, wherein this work has been mentioned as Śrīraṅganāthāṣṭaka in the list of other works given therein.

Complete.

Same work as the above, but with the addition of three stanzas in the beginning and with colophon as given below :—

विमानं प्रणवाकारं वेदशृङ्गं महाद्भुतम् ।
श्रीरङ्गशायी भगवान् प्रणतार्थप्रता(दा)यकः ॥ १ ॥
अनन्तानन्तशयन पुराणपुरुषोत्तम ।
रङ्गनाथ जगन्नाथ नाथ तुसं(भ्यं) नमो नमः ॥ २ ॥
देशान्तरगतो वापि द्वीपान्तरगतोऽपि वा ।
श्रीरङ्गाभिमुखो भूत्वा प्रणिपत्य न सीदति ॥ ३ ॥

Colophon:

श्रीरिङ्गाष्टकं संपूर्णम् ॥

No. 10248. रङ्गनाथाष्टकम्.
RAṄGANĀTHĀṢṬAKAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 107*b* of the MS. described under No. 2761.

Complete.

Similar to the above.

Beginning:

उदारं महान्तं जगत्पालयन्तं सदारङ्गनायक्युपेतं विभान्तम् ।
वदारं रसज्ञे हरिं लोकनाथं मुदा रङ्गपुर्यां स्थितं लोकनाथम् ॥ १ ॥

End:

प्रदातुं वरं मानवेभ्यश्च योऽमानवेभ्यो वरं मानमेयौ ममाम ।
त्यजत्यानतं मां कथं किंकरं मा विभातीह हैमासने रङ्गधाम ॥ ८ ॥

No. 10249. रङ्गराजप्रपत्तिः.
RAṄGARĀJAPRAPATTIḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 45*a* of the MS. described under No. 9718.

Complete.

Same work as that described under R. No. 173(*t*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but this is complete.

End:

श्रीशः श्रिया घटकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
श्रीरङ्गराज परवान्न तु जातु मह्यम् ॥ २४ ॥

No. 10250. रङ्गराजप्रपत्तिः.

RAṄGARĀJAPRAPATTIḤ.

Pages, 3. Lines, 23 on a page.

Begins on fol. 29*a* of the MS. described under No. 5959.

Complete.

Same work as the above, but with colophon as given below :—

रङ्गराजप्रपत्तिः संपूर्णा ॥

No. 10251. रङ्गराजप्रपत्तिः.

RAṄGARĀJAPRAPATTIḤ.

Pages, 2. Lines, 20 on a page.

Begins on fol. 29*b* of the MS. described under No. 2043.

Complete.

Same work as the above, but without colophon.

No. 10252. रङ्गराजप्रपत्तिः

RAṄGARĀJAPRAPATTIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 27*b* of the MS. described under No. 9745.

Complete.

Same work as the ab ov

No. 10253. रङ्गराजमङ्गलाशासनम्.
RAṄGARĀJAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 45*b* of the MS. described under No. 9718.

Complete.

Same work as that described under R. No. 173(*u*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but this contains the beginning.

Beginning:

लक्ष्मीचरणलाक्षाङ्कसाक्षिश्रीवत्सवक्षसे ।
क्षेमंकराय सर्वेषां श्रीरङ्गेशाय मङ्गलम् ॥ १ ॥

No. 10254. रङ्गराजमङ्गलाशासनम्.
RAṄGARĀJAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 28*b* of the MS. described under No. 9745.

Complete.

Same work as the above.

No. 10255. रङ्गराजमङ्गलाशासनम्.
RAṄGARĀJAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 67*a* of the MS. described under No. 5777.

Complete.

Same work as the above.

No. 10256. रङ्गराजमङ्गलाशासनम्.
RAṄGARĀJAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 9651.

Complete.

Same work as the above.

No. 10257. रङ्गराजमङ्गलाशासनम्.
RAṄGARĀJAMAṄGALĀŚĀSANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 13*b* of the MS. described under No. 9655.

Complete.

Same work as the above, but with the addition of one extra stanza at the end as given below :—

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥

No. 10258. रङ्गराजसुप्रभातम्.
RAṄGARĀJASUPRABHĀTAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 9745.

Complete.

Similar to the work described under No. 10241.

Beginning:

श्रीरङ्गभूमितलभूसुरदेशिकेन्द्रैः
श्रीरङ्गवाटमिदमित्युदितै(त) प्रमोदैः ।
श्रीभूमिपाणिकमलैश्च समाश्रिताङ्घ्रे
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ २ ॥

End:

लक्ष्मीश केशव हरे नृहर मुरारे शौरे रमारमण कारण दीनबन्धो ।
इत्यादरेण वदतामिह वाञ्छितार्थं श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥
इत्थं वृषाचलपते तव सुप्रभातं ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां प्रज्ञा परार्थसुलभं परमं प्रसूते ॥

Colophon:

श्रीरङ्गराजसुप्रभातं संपूर्णम् ॥

No. 10259. रङ्गराजसुप्रभातम्.
RANGARĀJASUPRABHĀTAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 9704.

Complete.

Same work as the above, but with a different end as given below:—

End:

सुप्रभाताष्टकमिदं सुकृताभिधेयं प्रातः समाहितमतिर्यतवान्व(ग्व)देत।
तस्मै भुजङ्गशयनो भुवि रङ्गनाथः सर्वाणि वाञ्छितफलानि सदा प्रसूते॥
श्रीरङ्ग, कस्तूरी, लीला, जम्बु, श्रीचन्द्र, सूर्ये, लक्ष्मी, सुप्रभात, उत्तिष्ठ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु॥

No. 10260. श्रीरङ्गराजस्तवः.
ŚRĪRAṄGARĀJASTAVAḤ.

Pages, 34. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 9706.

Complete in two Śatakas

Same work as that described under R. No. 174(*q*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but this is complete.

End:

त्वं मीनपानीयनते(ये)न कर्मधीभक्तिवैराग्यजुषो बिभर्षि।
रङ्गेश मां पासि मितंपचं यत्पानीयशालं मरुभूषु तत्स्यात्॥ १०९॥
श्रीपराशरभट्टार्यः . . . श्रेयसे मेऽस्तु भूयसे॥

Colophon:

श्रीरङ्गराजस्तवे उत्तरशतकमिदम्॥

No. 10261. श्रीरङ्गराजस्तवः.

ŚRĪRAṄGARĀJASTAVAḤ.

Pages, 29. Lines, 7 on a page

Begins on fol. 11*a* of the MS. described under No. 9754, and not on fol. 10*b* as stated therein.

Complete.

Wants the first seventeen stanzas; otherwise complete.

Same work as the above, but with full colophon as given below:—

इति श्रीहरि(त)कुलतिलकश्रीवत्साङ्कमिश्रसूनोः श्रीरङ्गराजदिव्याज्ञालब्धश्रीपराशरभट्टनामधेयस्य श्रीरङ्गनाथस्य कृतौ श्रीरङ्गराजस्तवः संपूर्णः ॥

No. 10262. श्रीरङ्गराजस्तवः.

ŚRĪRAṄGARĀJASTAVAḤ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 112*a* of the MS. described under No. 2079.

Both the Śatakas complete.

Same work as the above.

No. 10263. श्रीरङ्गराजस्तवः.

ŚRĪRAṄGARĀJASTAVAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 23. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Śrīraṅgarājastava with commentary 13*a*, Ksamāṣōḍaśī 42*a*.

Contains the Uttaraśataka only.

Same work as the above.

No. 10264. श्रीरङ्गराजस्तवः.
ŚRĪRAṄGARĀJASTAVAḤ.

Pages, 32. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 2964.

Contains the Pūrvaśataka almost complete and stanzas 7 to 20 of the Uttaraśataka.

Same work as the above.

No. 10265. श्रीरङ्गराजस्तवः.
ŚRĪRAṄGARĀJASTAVAḤ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 12. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other works herein are Varadarājastava 1*a*, Sundarabāhustava 6*a*, Saccaritrasudhānidhi 20*a*, Dēvarājāṣṭaka 68*b*, Prapannakartavyavidhi 69*a*, Trimatasiddhāntasārasaṅgraha 142*a*, Mānasikasnāna 151*a*, Bhagavaddhyāna 151*b*, Kaiśikamāhātmya 152*a*.

Contains the Uttaraśataka complete.

Same work as the above.

No. 10266. श्रीरङ्गराजस्तवः.
ŚRĪRAṄGARĀJASTAVAḤ.

Pages, 38 Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2781.

Complete.

Same work as the above, but with the addition of a few stanzas in the beginning as given below:—

श्रीरङ्गनायकि सुधामधुरं कटाक्षपूरं गभीरभवसागरबाडबाग्नेः ।
आलिङ्गनेन परितः परितप्तगात्रे कूलंकषं म . . . . कम्पयैव ॥
श्रीरम्ब तेन प्रथितप्रतीतिः श्रीरङ्गराजस्तव एव जातम् ।
धीसंभृतानां विरचय्य भोग्यं श्रीशं च . . . नौमि ॥

श्रीवत्साङ्कगुरोः सुतः श्रुतिशिरोयुग्मैकनिर्वाहकैः
शिष्यैः ख्यापिततत्त्ववित्त्वविभवो ल . . . क्षितः ।
श्रीरङ्गेशपुरोहितः शतकयोद्वध्य(र्वद्वा) द्वयाख्यं मनुं
व्याचिख्यासुरसंग्रहं समनतोच्छ्रीरङ्गरा(जः स्वयम्) ॥
(श्रीमत्)पराशरगुरुः श्रुतिमूर्धसिद्धानर्थाननर्थशतदन्तुरमन्दधीभ्यः ।
श्रीरङ्गराजविषयस्तवकैतवेन प्राचीकश . . . पया स्वयैव ।।
शेषाचलार्यतनुजरामानुजगुरुजवेङ्कटनिवासः ।
व्याख्याति ख्यातधिषणः श्रीर . . . द्वन्द्वयैकार्थम् ॥

No. **10267.** श्रीरङ्गराजस्तवः—द्राविडटीकासहितः.

ŚRĪRAṄGARĀJASTAVAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 31. Lines, 5 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Contains the stanzas 4 to 29 in the Pūrvaśataka.

Same work as the above, but with Tamil meaning.

No. **10268.** श्रीरङ्गराजस्तवः—सव्याख्यः.

ŚRĪRAṄGARĀJASTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 86. Lines, 7 on a page Character, Telugu. Condition, injured. Appearance, old.

Wants four stanzas in the beginning; otherwise the Pūrvaśataka is complete.

Same poem as the above, but with a commentary. The name of the commentator is not known.

Beginning :

भगवत्स्वरूपतिरोधायकमायामाहात्म्येन भव(जग)ति ज्ञानभक्त्यवग्रहे विजृम्भमाणे सति भगवत्स्वरूपानुभवोपयोगिगुणजातं कारुणिकत्वेन अनियमेन वर्षन्तं नाथमुनिं स्तुवन्ति—

नौमि नाथमुनिं नाम जीमूतं भक्त्यवग्रहे ।
वैराग्यभगवत्तत्त्वज्ञानभक्त्यभिवर्षुकम् ॥

भक्त्यवग्रहे भक्त्यनावृष्टौ; अवग्रहो वृष्टिप्रतिबन्धहेतुः । वैराग्य-भगवत्तत्त्वज्ञानभक्त्यभिवर्षुकम् इतरविषयविरक्तिभगवद्विषयज्ञप्तिभक्तिप्रमुखगुणजातमभितो वर्षन्तं नाथमुनिं नाम जीमूतं वर्षुकवारिवाहं नौमि स्तौमि ।

नम्राणां चतुर्मुखमुखानां स्तोमः समूहो वा स्वर्णकमलसमूहो वेति संदिह्यमानैः रघुनाथजानकीभ्यां समर्पितैः हेमाम्भोजैः कनककमलैः नि-बिडनिकटे नीरन्ध्रसमीपे श्रीरङ्गेन्दोः पदकिसलये श्रीरङ्गनाथचरणपल्लवौ वन्दे ॥

श्रीपराशरभट्टार्यचरणौ संश्रयमेहि ।
यद्वक्त्ररङ्गे रङ्गेशगोष्ठ्यां ब्राह्मी प्रनृत्यति ॥

Colophon:

इति प्रथमखण्डः समाप्तः ॥

न जातु पीतामृतमूर्छितानां नाकौकसां नन्दनवाटिकासु ।
रङ्गेश्व(र) त्वत्पुरमाश्रितानां रथ्याशुनामन्यतमो भवेयम् ॥

No. **10269.** श्रीरङ्गराजस्तवः—सव्याख्यः.

ŚRĪRAṄGARĀJASTAVAḤ WITH COMMENTARY.

Substance, paper. Size, $8\frac{1}{8} \times 5\frac{3}{8}$ inches. Pages, 130. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same hymn as the above, but with a different commentary.

The commentator is Rāmānujācārya, a member of the Garga family and a disciple of Vēṅkaṭācārya.

Beginning:

पश्यन् गोदावरीमग्रे प्राङ्मुखः पद्मकासनः ।
नरसिंहवपुर्विष्णुरव्याद्धर्मपुरे वसन् ॥

तस्य श्रीवेङ्कटार्यस्य चरणौ शरणं वृणे ।
यदीयसेवा सर्वेषां सूते तत्त्वार्थनिर्णयम् ॥
नानावृत्तश्लोकभङ्ग्या प्रवृत्तं श्रीरङ्गेशस्तोत्रमध्यात्मगर्भम् ।
श्रीमद्भट्टैरादरेण प्रणीतं यावच्छक्ति व्याकरोमि क्रमेण ॥

अथ तावद्भगवता चतुर्मुखेण स्वभवने चिरकालमभ्यर्चितं पश्चा- दिक्ष्वाकुचक्रवर्तिने तपसा तोषितेन तेन स्वयमभ्यर्चनार्थन्यासरूपेण समर्पितं तदा प्रभृति रघुनायकपर्यन्तमयोध्यायां सरयूतीरे तद्वंशपरम्परया समाराधितं स्वावतारप्रयोजनानन्तरं स्वपदं जिगमिषुणा तेन स्वविश्लेषा- सहिष्णवे श्रीविभीषणाय स्वप्रतिनिधितया न्यासरूपेण समर्पितं तस्मिन् स्वपुरं लङ्कामधिगच्छति सति मध्येमार्गं केनापि व्याजेन तत्रत्यसकल- जनानुजिघृक्षया कावेरीद्वयमध्ये कृतावतारं ब्रह्मपुराणगारुडपुराणादिषु प्रतिपादितप्रभावं शेषशायिनं पुरुषोत्तमं तद्विभूतिं श्रीरङ्गक्षेत्रं च तुष्टूषुः सर्वानुग्रहार्थं भाष्यकारसकाशाल्लब्धं विशेषार्थं च स्तोत्रे तत्र तत्र प्रदर्श- यिष्यन् स्वप्रार्थनां चाविष्कुर्वन् दिव्यप्रबन्धसिद्धमप्यर्थं तत्र तत्र दीप- यन् परमतं च निराकरिष्यन् श्रीभट्टारकः सर्वस्यापि श्रेयसो गुरुमूल- तया भगवत्स्तुतेरपि तदीयस्तुतेरन्तरङ्गतया च प्रथमं गुरुपरम्परां स्तौति । तत्राचार्यभूतस्वपितरं नमस्यति—

श्रीवत्सचिह्नमिश्रेभ्यो . यान्ति मङ्गलसूत्रताम् ॥

इति । नमउक्तिं नम इति वचनमधीमहे वेदवदवश्यमावर्तामहे । 'शिवात् परतरं नास्ती'ति प्रतिजाना(ना)नां प्रतिवादिनां मध्ये 'विष्णु- रस्ति ततः परम्' इत्येवंरूपा यदुक्तयः ।

End :

मरुभूमिषु निर्जलप्रदेशेषु पानीयशालं स्यात्; 'विभाषा सेनासु- राच्छायाशालानिशानाम्' इति शालाशब्दस्य नपुंसकलिङ्गत्वम् । अतः कर्मज्ञानभक्तिनिष्ठानां रक्षणमरक्षणमात्रमकिंचनस्य मम रक्षणमेव रक्षण- मिति सर्वं समञ्जसम् ॥

Colophon :

इति गर्गकुलतिलकश्रीरामानुजाचार्येण(कृते) श्रीरङ्गराजस्तवव्याख्याने उत्तरभागः समाप्तः ॥

वेङ्कटाचार्यशिष्येण रामानुजविपश्चिता ।
रङ्गराजस्तुतिव्याख्या यथामति विनिर्मिता ॥

The scribe adds :

श्रीरङ्गनाथपादाब्जान्तरङ्गाप्पन्वेङ्कटाचार्यशिष्येण श्रीनिवासेन लिखितम् ॥

श्रीपराशरभट्टार्यः . . . श्रेयसे मेऽस्तु भूयसे ॥

No. **10270.** श्रीरङ्गराजस्तवः—सव्याख्यः.

ŚRĪRAṄGARĀJASTAVAḤ WITH COMMENTARY.

Pages, 60. Lines, 8 on a page.

Begins on fol. 13*a* of the MS. described under No. 10263.

Breaks off in the sixty-eighth stanza in the Pūrvaśataka.

Same work as the above.

No. **10271.** श्रीरङ्गराजस्तवः—सव्याख्यः.

ŚRĪRAṄGARĀJASTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 175. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Pūrvaśataka complete and breaks off in the thirty-eighth stanza in the Uttarśataka

Same work as the above.

No **10272.** राघवाष्टकम्.

RĀGHAVĀṢṬAKAM.

Pages, 3 Lines, 5 on a page.

Begins on fol. 25*b* of the MS. described under No. 3178.

Complete.

Eight stanzas in praise of Rāma who is considered to be a descendant of the Raghu race and an incarnation of Viṣṇu.

Beginning:

राघवं करुणाकरं मुनिसेवितं सुरवन्दितं
जानकीवदनारविन्ददिवाकरं गुणभाजनम् ।
वालिसूनुहिदे(ते)क्षणं हनुमत्प्रियं कमलेक्षणं
यातुधानभयंकरं प्रणमामि राघवकुञ्जरम् ॥ १ ॥

End:

राम राम नमोऽस्तु ते जय रामभद्र नमोऽस्तु ते
रामचन्द्र नमोऽस्तु ते (जय) राघवाय नमोऽस्तु ते ।
देवदेव नमोऽस्तु ते जय देवराज नमोऽस्तु ते
वासुदेव नमोऽस्तु ते वरदराज नमोऽस्तु ते ॥ २ ॥

No. 10273. राघवाष्टकम्.
RĀGHAVĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 8609.

Complete.

Same work as the above.

No. 10274. राघवाष्टकम्.
RĀGHAVĀṢṬAKAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 9*a* of the MS. described under No. 4756.

Breaks off in the fourth stanza.

Same work as the above.

No. 10275. रामकर्णामृतम्.
RĀMAKARṆĀMṚTAM.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 10239.

Complete.

Stanzas of sweet rhythm in praise of Rāma.

Beginning:

श्रीरामं त्रिजगद्गुरुं सुरवरं सीतामनोनायकं
श्यामाङ्गं शशिकोटिपूर्णवदनं चञ्चत्कलाकौस्तुभम् ।
सौम्यं सत्त्वगुणोत्तमं नु सरयूतीरे वसन्तं प्रभुं
त्रातारं सकलार्थसिद्धिसहितं वन्दे रघूणां पतिम् ॥
श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि ॥

End:

श्रीरामायणमादिकाव्यमृषिणा वाल्मीकिना निर्मितं
वेदान्तार्थविशारदैरनुदिनं स्तुत्यं सुरैरर्चितम् ।
श्रोतृणामघनाशनं सुरतरोस्तुल्यं च मुक्तिप्रदं
ये शृण्वन्ति पठन्ति रामचरितं ते यान्ति विष्णोः पदम् ॥१०६॥

No. 10276. रामकर्णामृतम्.
RĀMAKARṆĀMṚTAM.

Pages, 13. Lines, 8 on a page.

Begins on fol. 36b of the MS. described under No. 9729.

Complete.

Same work as the above, but with a colophon as given below :—

समाप्तमिदं रामकर्णामृतम् ॥

No. 10277. रामचन्द्रदयाष्टकम्.
RĀMACANDRADAYĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 29b of the MS. described under No. 4390.

Complete.

Eight stanzas in praise of the grace of Rāmacandra by Rāma-candrēndra.

Beginning:

दयार्द्रदृष्ट्या पश्यन्तमादराद्भक्तसन्ततिम् ।
रामचन्द्रं नमस्कुर्वे दयामृतकलेबरम् ॥
दयनीयं भक्तजातं दयालुर्भगवान्हरिः ।
इति भागवतोद्गीतं श्रुत्वा त्वां शरणं गतः ॥ १ ॥

End:

रामचन्द्रेन्द्रसंगीतरामचन्द्रदयाष्टकम् ।
यः पठेद्दयनीयोऽभूत्त्रिपान्नारायणस्य सः ॥ ९ ॥

No. 10278. रामचन्द्राष्टकम्.
RĀMACANDRĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 9298.

Complete.

Similar to the work described under No. 10272.

Beginning:

पटुजलधरधीरध्वानमादाय चापं पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे रणहतदनुजेन्द्रो रामचन्द्रः सहायः ॥१॥

End:

सकलशुभकरं श्रीरामचन्द्राष्टकं यः
पठति दिनमुखादौ नित्यसंसारयात्रा(?) ।
सपदि रघुपतिस्तं पार्श्वतः पृष्ठतोऽग्रेऽ-
वतु सहजसमेतः सज्यकोदण्डपाणिः ॥ ९ ॥

No. 10279. रामचन्द्राष्टकम्.
RĀMACANDRĀṢṬAKAM.

Substance, palm-leaf. Size, $6\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 34*b*. The other works herein are Lakṣmīnṛsiṁhakarāvalambastōtra 1*a*, Śyāmaladaṇḍaka 3*a*, Cāṭuślōkālu

(Telugu) 10*a*, Pāṭulu Padyālu (Telugu) 21*a*, Jagannāthanāṭakamu (Telugu) 28*a*, Pāṭulu (Telugu) 30*a*.

Complete.

Same work as the above.

No. 10280. रामतारावलिः.
RĀMATĀRĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 28*b* of the MS. described under No. 2571.

Complete.

A number of stanzas in praise of Rāma. In the Tārāvali form of composition there used to be 27 stanzas, while in this work only 25 stanzas are found.

Beginning:

तारकं ताटकारातिं तापत्रयनिवारकम् ।
तत्स्वरूपचिदानन्दं रामं वन्दे जगद्गुरुम् ॥ १ ॥

सर्वज्ञसर्वदेवेशसनकादिभिरर्चितम् ।
सनातनतमं देवं रामं वन्दे जगद्गुरुम् ॥ २ ॥

End:

यो गतिः सर्वभूतानां योगदानादिशर्मिणाम् ।
योगमायाधारभूतं रामं वन्दे जगद्गुरुम् ॥ २४ ॥
रामतारवलीमेनां प्रत्यहं यः पठेन्नरः ।
स गच्छन् रामसायुज्यं न पुनर्लभतेऽसुखम् ॥ २५ ॥

No. 10281. रामदण्डकः.
RĀMADAṆḌAKAḤ.

Pages, 14. Lines, 4 on a page.

Begins on fol. 9*a* of the MS. described under No. 2279.

Complete.

A kind of composition written in Daṇḍaka metre in praise of Rāma

Beginning:

जय श्रीजानकीकान्त जय कल्याणविग्रह ।
जय वन्दारुमन्दार जय राम दयाम्बुधे ॥

जय दशरथनन्दनानन्दभर्मो हरे भूरिभूभारसंहारसंचारगम्भीरजम्भारि-संभाव्यवैदुष्यमानुष्यविध्वस्तवित्रस्तरक्षस्तते ।

End:

राममनामामृतोङ्कारसंज्ञास्तु मे चिन्तये जानकीकान्तशान्तं सदा ते नमो राम सद्धर्मणे ब्रह्मणे सच्चिदानन्दरूपाय तुभ्यं नमः ॥

No. **10282.** रामदण्डकः.
RĀMADAṆḌAKAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 49*b* of the MS. described under No. 4470.

Complete.

Similar to the above.

Beginning:

या विदेहेनपुत्रीति स्तूयते यश्च सूरिभिः ।
सा मैथिली स च रा(मा)त्मा स च शौरिर्मुदेऽस्तु वः ॥

रघुकुलकलशाब्धिराकाशशाङ्काय ते कामगर्वापहाकाररम्याय हन्मुख्य नाका(श्र)यौघप्रवेकार्चितायावलोकास्तसद्भक्तलोकामयापात्तशोकाय नित्यं समीकाङ्क्षणायातनैकायुधालम्बिकोकावलिप्रत्यनीकायुतक्षीबघूकारुणायातसी कान्तये भूमिजाकामुकेदं नमो राघव ।

End:

समीरात्मजासेव्यमारात्तुषारांशुसूरायिताक्षं भजे राघवम् ॥
इति चतुर्थश्चरणः ॥

श्रीरामधर्मकथया दूषणरहितेऽत्र दण्डकोद्देशे ।
न कथं रमेत विदुषां मञ्जुधृताभाजि मानसं सततम् ॥

Colophon:

इति श्रीरामदण्डकं संपूर्णम् ॥

No. 10283. रामप्रपत्तिः.
RĀMAPRAPATTIḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 27*a* of the MS. described under No. 5959.

Complete.

Stanzas expressing the self-surrender of the author to Rāma as a means of obtaining salvation.

Beginning :

मदीयैः सदा वाणिहृत्कर्मभिस्ते
सदैवानुकूल्यं करिष्यामि राम ।
इतीमां प्रतिज्ञां ममान्तःस्थितिस्त्वं
ददास्येव मां रक्ष तां च प्रतिज्ञाम् ॥

मम त्वां प्रति स्वामिकं नैजदास्यं यतस्तस्य मत्कायहृत्कर्मवाग्भिः ।
करिष्यामि न प्रातिकूल्यं च राम प्रतिज्ञामिमां मां च जानासि रक्षाम् ॥

End :

अनाथं हि पुण्यं भवाब्धौ भ्रमन्तं त्वदङ्घ्र्यब्जचिन्तार्चनादिष्वसक्तम् ।
निरालम्बनं शोच्यमज्ञानिनं मां त्वमेवंविधं राम जानासि रक्ष ॥

Colophon :

श्रीरामप्रपत्तिः संपूर्णा ॥

No. 10284. रामप्रपत्तिः.
RĀMAPRAPATTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 411, wherein this work has been omitted to be mentioned in the list of other work given therein.

Complete.

Similar to the above.

Beginning :

श्रुतं ब्रह्म सत्यं यदादौ प्रधानं तदन्ते पुनर्ब्रह्मवाक्ये महेशात् ।
परं श्रूयते सेन्द्रवेधादिवेद्यं समस्तं यतो यश्च सर्वं यदन्तम् ॥

यद्ब्रह्मादौ सूचितं सूत्रवाक्यैर्व्याख्यातं सत्यभूतं च ऋग्भिः ।
प्रत्यग्भूतं यच्च सर्वस्य जन्तोस्तद्ब्रह्माख्यं रामधाम प्रपद्ये ॥

End:

यद्विज्ञानात्सत्यवादित्वमेति यस्मात्सत्याज्जायते चातिवादी ।
यस्मिन् लब्धे नास्ति कर्तव्यबुद्धिस्तद्ब्रह्माख्यं रामधाम प्रपद्ये ॥

No. **10285.** रामब्रह्मस्तुतिः.
RĀMABRAHMASTUTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 77*a* of the MS. described under No. 757.

Complete.

This forms the 120th Sarga of the Yuddhakāṇḍa of the Rāmāyaṇa and in it Rāma is praised by the gods Yama, Indra, Varuṇa, etc., to be no other than the Supreme Brahman.

Beginning:

ततो हि दुर्मना रामः श्रुत्वैव वदतां गिरः ।
मध्ये मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥
ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ॥

* * * *

अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ।
भवान्नारायणो देवः श्रीमांश्चक्रधरो हरिः ॥

End:

ये त्वां देव ध्रुवं प्राप्ताः पुराणपुरुषोत्तमम् ।
प्राप्नुवन्ति सदा कामानिह लोके परत्र च ॥
इममार्षं स्तुवान्नित्यमितिहासं पुरातनम् ।
ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥

Colophon:

इति श्रीयुद्धकाण्डे विंशत्युत्तरशततमः सर्गः ॥

No. 10286. रामभुजङ्गस्तोत्रम्.
RĀMABHUJAṄGASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 88*b* of the MS. described under No. 633.

Incomplete.

Stanzas in praise of Rāma in the Bhujaṅgaprayāta metre.

Beginning:

प्रभो पारिजातस्य मूले पवित्रे विचित्रे सुचित्रे शुभे हैमहर्म्ये ।
लसद्रत्नपीठे कृतावास सीतासमेतोज्ज्वलाकल्प राम प्रसीद ॥

End:

चण्डकरान्वयमण्डन रक्षोमण्डलखण्डनपण्डितबाहो ।
कुण्डलमण्डितगण्डतलं ते नाथ नमामि नमामि नमामि ॥

No. 10287. रामभुजङ्गस्तोत्रम्.
RĀMABHUJAṄGASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 8920.

Complete.

Same work as the above, but with a different end.

End:

राम मनोहरहारकलाप स्मेरमुखाम्बुज राघव राम ।
देव कृपालय पालय मां त्वं पाहि सदा शरणं शरणं मे ॥

No. 10288. राममङ्गलस्तोत्रम्.
RĀMAMANGALASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 67*b* of the MS. described under No. 430.

Complete.

Stanzas of praise addressed to Rāma and praying for his benedictions.

Beginning :

लक्ष्मीशो भुवनत्रयेण विवशो देवान्मनुष्योरग-
स्सा(स्वा)न्तःस्थः करुणानिधिः करुणया मार्ताण्डवंशे ययौ ।
कौसल्यानिजगर्भसंभवकृते जन्मन्यसाधारणे
जातः श्रीरघुनायकस्य जननं देयादयं(त्सदा)मङ्गलम् ॥ १ ॥

End:

वस्त्राबन्धनमोक्षजौ वधुवरौ नीतावता(था)रापणं
पूर्णाः कुम्भाभिषेचहोमविधिवद्धौपासनानन्तरम् ।
वृद्धाशीर्वचनानि पुण्यफलदैः सारुन्धतीदर्शनं
सीताराघवयोर्विवाहसमये देयात्सदा मङ्गलम् ॥ ७ ॥

No. 10289. राममङ्गलाशासनम्.

RĀMAMANGALĀŚĀSANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 10239.

Complete.

Stanzas pronouncing benedictions on Rāma and mentioning the chief events of his life. They are generally repeated at the close of a formal reading of the Rāmāyaṇa.

Beginning :

मङ्गलं भगवन् विष्णो मङ्गलं मधुसूदन ।
मङ्गलं पुण्डरीकाक्ष मङ्गलं गरुडध्वज ॥
मङ्गलं कोसलेन्द्राय महनी(य)गुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥

End:

आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥
विभीषणकृते प्रीत्या विश्वाभीष्टप्रदायिने ।
जानकीप्राणनाथाय सदा रामाय मङ्गलम् ॥

No. 10290. राममङ्गलाशासनम्.

RĀMAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 9729.

Complete.

Same work as the above, but without the first stanza.

No. 10291. राममङ्गलाशासनम्.

RĀMAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 9651.

Complete.

Similar to the above.

Beginning:

मुनिमानसहंहा(सा)य मारसुन्दरमूर्तये ।
सिताब्जपत्रनेत्राय सीतारामाय मङ्गलम् ॥ १ ॥
विश्वामित्रमुनिश्रेष्ठमखरक्षणशालिने ।
ताटकासुवि(त)नाशाय रघुनाथाय मङ्गलम् ॥ २ ॥

nd:

दशाननकुलारण्यदहनोग्रदवाग्नये ।
रावणानुजपालाय रघुनाथाय मङ्गलम् ॥ १२ ॥

No. 10292. रामरत्नदशकम्.

RĀMARATNADAŚAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 9729, wherein this work has been mentioned as **Rāmatārakastōtra** in the list of other works given therein.

Complete.

Ten stanzas in praise of Rāma, each containing his name, the repetition of which is considered to be the means of obtaining salvation.

Beginning:

वेणुनादलोलबालगोपिकाकदम्बकं लीलयोद्धृतैकशैलगुप्तगोकदम्बकम् ।
कामरूपकेलिलोलभूविलासिनीपतिं राम राम राम राम नाम जल्प तारकम् ॥

End:

पापितापजातभेदकारणं गुणान्वितं रामदिव्यनामयुक्तवृत्तपञ्चकद्वयम् ।
भुक्तिमुक्तिदानचित्तवृत्तिमन्वहं वक्ति यः शृणोति सोऽपि वाञ्छितं समीहते ॥

Colophon:

इति श्रीमद्रामरत्नदशकं संपूर्णम् ॥

No. **10293.** राघवाष्टकम्.
RĀGHAVĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 5787, wherein it has been mentioned as Rāmalakṣmaṇāṣṭaka in the list of other works given therein.

Complete.

Eight stanzas in description and praise of Rāma and Lakṣmaṇa.

Beginning:

कमललोचनौ काञ्चनाम्बरौ कवचभूषणौ कार्मुकान्वितौ ।
कलुषसंहरौ कामितप्रदौ रहसि नौमि तौ रामलक्ष्मणौ ॥
धृतशिखण्डिनौ दीनरक्षकौ धृनिहिमाचलौ दिव्यविग्रहौ ।
दिविजपूजितौ दीर्घदोर्युगौ रहसि . . . . ॥

End:

मकरकुण्डलौ मौनिसेवितौ मनु(णि)किरीटिनौ मानुषोत्तमौ ।
मनुकुलोद्भवौ मञ्जुभाषिणौ रहसि . . . . ॥
वरगुणास्पदं राघवाष्टकं रहसि यः पठेद्रामभक्तिदम् ।
रहितकल्मषं रामसंनिधौ रविसमप्रभो राजते सदा ॥

No. 10294. राघवाष्टकम्.

RĀGHAVĀṢṬAKAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 9298, wherein this work has been mentioned as Rāmalakṣmaṇastōtra in the list of other works given therein.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

No. 10295. रामविश्वरूपस्तवः.

RĀMAVIŚVARŪPASTAVAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 83*b* of the MS. described under No. 9001.

Complete; as found in the Pādmapurāṇa.

A hymn in praise of Rāma, who is stated in the Pādmapurāṇa as having shown his universal all-pervading form of Viṣṇu just at the time of his coronation. The eulogy is said to have been made by God Śaṅkara.

Beginning:

सूत उवाच—

ततो बदरिकारण्यं पुण्यं प्राप्य सुधर्मधीः ।
व्यासं मुनिवरश्रेष्ठं नत्वा भीष्मोऽब्रवीद्वचः ॥

* * * *

अभिषिक्तस्तदा रामो वसिष्ठाद्यैः समन्त्रिभिः ।
शुशुभे सीतया देव्या नारायण इव श्रिया ॥
अत्यमर्त्यतया रूपमुपमातीतमुज्ज्वलम् ।
दृष्ट्वा तुष्टाव हृष्टात्मा शंकरो द्रष्टुमागतः ॥
कृताञ्जलिपुटो भूत्वा सानन्दो गद्गदाकुलः ।
हर्षयन्सकलान्देवान्मुनीनपि च मान्वान् ॥

रुद्रः—

नमो मूलप्रकृतये नित्याय परमात्मने ।
सच्चिदानन्दरूपाय विश्वरूपाय वेधसे ॥

End:

इत्थं विसृष्टाः खलु ते च सर्वे स्वं स्वं पदं जग्मुरतीव तुष्टाः ।
हृष्टाः पठन्तः स्तवमीश्वरोक्तं रामं स्मरन्तो नरविश्वरूपम् ॥

Colophon:

इति श्रीपाद्मे पुराणे श्रीरामविश्वरूपसंदर्शनस्तवः समाप्तः ॥

No. 10296. रामवेदपादस्तवः.

RĀMAVĒDAPĀDASTAVAḤ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 64*a* of the MS. described under No. 139, wherein this work has been mentioned as **Vēdapādastava** 66*a* in the list of other works given therein.

Complete.

In praise of Rāma. The last quarter of each stanza in this work is a Vedic quotation.

Beginning:

अनन्तं सच्चिदानन्दमच्युतं विष्णुमद्वयम् ।
रामब्रह्ममयं शुद्धमग्निमीळे पुरोहितम् ॥ १ ॥
आनन्दमस्य जन्मादि वेदयोनेर्यतो भवेत् ।
तद्रामाख्यं वयं प्रत्यगगन्म ज्योतिरुत्तमम् ॥२ ॥

End:

वेदपादस्तवं चक्रे सीतारामप्रसादतः ।
रामब्रह्मानुमोदध्वं विप्रासो जातवेदसः ॥ ८९. ॥

Colophon:

रामवेदपादस्तवः संपूर्णः ॥

No. 10297. रामवेदपादस्तवः.

RĀMAVĒDAPĀDASTAVAḤ.

Pages, 10. Lines, 20 on a page.

Begins on fol. 262*b* of the MS. described under No. 8056.

Complete.

Same work as the above.

No. 10298. रामवेदपादस्तवः.

RĀMAVĒDAPĀDASTAVAḤ.

Substance, palm-leaf. Size, 12 × 1⅜ inches. Pages, 6. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 6 *a*. The other works herein are Svātmaprakāśikā 1*a*, Gītāsāra 7*a*, Mahimnassṭava 14*a*, Dakṣiṇāmūrtyaṣṭaka 20*a*, Dakṣiṇāmūrtyaṣṭakavyākhyā (Mānasōllāsa) 23*a*, Rāmasaptarṣistōtra 49*a*, Rāmayantrōddhāra 51*a*, Samādhinirūpaṇa 54*a*, Śrutigītā 55*a*, Śivōhambhāvanāvivaraṇāṣṭaka 61*a*, Praśnōttararatnamālikā 63*a*, Sandhyāvandanamantra 69*a*.

Complete.

Same work as the one described under R. No. 331(*f*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but with the addition of one extra stanza at the end and with a different colophon as given below. According to this colophon the author is one Mahādēvakavi :—

दोर्भिः खड्गं त्रिशूलं वरदमृगमसिं चन्द्रबाणं कुठारं
शङ्खं चक्रं मुसण्ठि हलमुसलगदाभिण्डिपालं च पाशम् ।
उद्यद्वह्निं च मुष्टिं ह्यभयवरकरं साङ्कुशं शुभ्रवर्णं
वन्दे रामं त्रिणेत्रं त्वमररिपुकुलं मर्दयन्तं प्रतापैः ॥

Colophon :

इति महादेवकविविरचितः श्रीरामवेदपादस्तवः संपूर्णः ॥

No. **10299.** रामसप्तर्षिस्तोत्रम्.

RĀMASAPTARṢISTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 10293.

Complete.

This work contains praises sung on Rāma by the Seven Sages, viz., Kāśyapa, etc. They all exhort the human mind to worship Śrī-Rāma.

Beginning:

काश्यपः—

नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासानुरुतरदुःखान तिदुःसाधानत्यन्तायासानंहोमूलानुग्रभयंकररौरवादिनरकगतिहेतूनेतानपि परिहर सातापतिमाशु परिचरेशं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ १ ॥

End:

वसिष्ठः—

नित्यानन्दं सत्यमनन्तं ब्रह्म परात्परमव्ययममलं नित्यं शुद्धं बुद्धं शान्तं शाश्वतमप्रमेयमनाद्यन्तं सर्वासामुपनिषदामर्थोऽयं श्रीरामः सीतापतिरिति चतुराननशिवहैमवतीजपसर्वस्वमन्त्रं भो चेतः श्रीरामं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ७ ॥

एवं स्तुत्वा रामचन्द्रं मुनीन्द्राः प्रत्येकास्ते भक्तिनम्रास्तदानीम् ।
आपन्नार्तिध्वान्तभानुं प्रपन्नास्तूष्णीमासन् रामपादैकनिष्ठाः ॥

Colophon:

सप्तर्षिस्तोत्रं संपूर्णम ॥

No. 10300. रामसप्तर्षिस्तोत्रम्.
RĀMASAPTARṢISTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 3178, wherein this work has been mentioned as Saptarṣistōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 10301. रामसप्तर्षिस्तोत्रम्.
RĀMASAPTARṢISTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 9372, wherein this work has been mentioned as Rāmanāmāṅkitastōtra in the list of other works given therein.

Complete.

Same work as the above, but without colophon. The stanzas herein are given in a different order.

No. 10302. रामसप्तर्षिस्तोत्रम्.
RĀMASAPTARṢISTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 44*a* of the MS. described under No. 432

Complete.

Same work as the above, but the stanzas here are given in a different order.

No. 10303 रामस्तवराजः.
RĀMASTAVARĀJAḤ.

Substance, paper. Size, $8\frac{1}{4} \times 7$ inches. Pages, 8. Lines, 21 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

This hymn in praise of Rāma is said to have been taught by Vēdavyāsa to Dharmaputra, when the latter questioned the former as to what is the highest truth and what contemplation leads to salvation.

Beginning:

सूत उवाच—

सर्ववेदार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

धर्मपुत्र उवाच—

भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं परं जप्यं किं ध्यानं मुक्तिसाधनम् ॥
ज्ञातुमिच्छामि तत् सर्वं ब्रूहि मे मुनिसत्तम ।

श्रीवेदव्यास उवाच—

धर्मराज महाभाग शृणु वक्ष्यामि तत्त्वतः ।
यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवम् ॥

* * * *

नारद उवाच—

नारायणं जगन्नाथमभिरामं जगत्पतिम ।
कविं पुराणं वागीशं रामं दशरथात्मजम् ॥
राजराजं रघुवरं कौसल्यानन्दवर्धनम् ।

End:

वाचिकं मानसं पापं कर्मणा समुपार्जितम् ।
श्रीरामस्मरणेनैव व्यपोहति नसंशयः ॥

श्रीरामचन्द्र रघुपुंगव राजवर्य राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामभद्र दासोऽहमद्य भवतः शरणागतोऽस्मि ।

Colophon:

इति रामस्तवराजः संपूर्णः ॥

This work is said to have been copied by Bōyanapalli Rāmuḍu for Taḍakamalla Kanakamma and completed on Wednesday, the 15th day of the bright fortnight of Phālguna, in the year Śubhakṛt.

No. **10304.** **रामस्तवराजः.**

RĀMASTAVARĀJAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 35*a* of the MS. described under No. 2571.

Complete.

Same work as the above.

No. **10305.** **रामस्तवराजः.**

RĀMASTAVARĀJAḤ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1843.

Complete.

Same work as the above.

No. **10306.** **रामस्तवराजः.**

RĀMASTAVARĀJAḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 6485.

Complete.

Same work as the above, but with the addition of the following few lines at the end :—

इदं सत्यमिदं सत्यं सत्येनैवेदमुच्यते ।
रामं सत्योदकं ब्रह्म रामा(दन्यं) न वेदयेत् ।
तस्मात्स्वरूपं तत्सत्यं सत्यं सर्वमिदं जगत् ॥

No. 10307. रामस्तवराजः.

RĀMASTAVARĀJAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 757.
Complete.

Same work as the above, but without colophon and with the addition of one stanza at the end as given below :—

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

No. 10308. रामस्तवराजः.

RĀMASTAVARĀJAH.

Substance, paper. Size, $4\frac{1}{2} \times 3\frac{5}{8}$ inches. Pages, 22. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

This is said to have been taken from Hiraṇyagarbhasaṁhitā.

Same work as the above, but with a different end as given below :—

End:

इति श्रीरामनाथस्य स्तवराजमनुत्तमम् ।
सर्वसौभाग्यसंपत्तिदायकं मुक्तिदं शुभम् ॥
ब्रह्मपुत्रेण कथितं वेदानां सारमुत्तमम् ।
गुह्याद्गुह्यतमं राजन् त्वयि प्रीत्या प्रकीर्तितः ॥
यः पठेच्छृणुयान्नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ।
स एव भक्तियुक्तेन विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति हिरण्यगर्भसंहितायां परमरहस्ये श्रीरामस्तवराजदिव्यस्तोत्रं संपूर्णम् ॥

No. 10309. रामस्तवराजः.
RĀMASTAVARĀJAḤ.

Pages, 10. Lines, 5 on a page.
Begins on fol. 5*a* of the MS. described under No. 8920.
Wants beginning and end.
Same work as the above.

No. 10310. रामस्तोत्रम्.
RĀMASTŌTRAM.

Pages, 3, Lines, 6 on a page.
Begins on fol. 1*b* of the MS. described under No. 5787.
Incomplete.
Similar to the above

Beginning:

नित्यं श्रीराममन्त्रं निरुपममधिकं नीतिसुज्ञानमन्त्रं
सत्यं श्रीराममन्त्रं सदमलहृदयं सर्वदारोग्यमन्त्रम् ।
स्तुत्यं श्रीराममन्त्रं सुललितमनघं सौख्यसौभाग्यमन्त्रं
पद्यं श्रीराममन्त्रं पवनजवरदं पातु मां राममन्त्रम् ॥

End:

कल्याणदं कौशिकयज्ञपालनं कलानिधिं काञ्चनशैलधैर्यम् ।
कंजातनेत्रं करुणासमुद्रं काकुत्स्थरामं कलयामि चित्ते ॥
रघुनन्दन एव दैवतं नो रघुवंशोद्भव एव दैवतं नः ।
भ(र)ताग्रजएव दैवतं नः

No. 10311. रामस्तोत्रम्.
RĀMASTŌTRAM.

Pages, 4. Lines, 6 on a page.
Begins on fol. 241*a* of the MS. described under No. 537 or 7247.
Complete.
Same work as the above.

No. **10312.** रामस्तोत्रम्.

RĀMASTŌTRAM.

Pages, 14. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 6101.

Complete.

This hymn in praise of Rāma is said to have been composed by Hanumat; and a repetition of the same is considered to absolve one from the sin of the murder of a Brahmin and to lead one to salvation after death.

Beginning:

अस्य श्रीरामचन्द्रस्तोत्रमन्त्रस्य श्रीरामचन्द्रो देवता, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

वायुपुत्रस्तथा मूर्छामपहाय शनैर्विभुः ।
आश्रित्य मानुषं भावं नारायणमजं विभुम् ॥

* * * *

संस्तौति जानकीनाथं स्तोत्रैः स्तुतिमनोहरैः ।
नमो रामाय हरये विष्णवे प्रभविष्णवे ॥

End:

य इदं वायुपुत्रेण कथितं पापनाशनम् ।
स्तोत्रं श्रीरामचन्द्रस्य सीतायाः पत्युरन्वहम् ॥

* * * *

एतत्स्तोत्रस्य पाठेन नरकं नैव यास्यति ।
ब्रह्महत्याविनिर्मुक्तो देहान्ते मुक्तिमाप्नुयात् ॥

No. **10313.** रामस्तोत्रम्.

RĀMASTŌTRAM.

Pages, 23. Lines, 6 on a page.

Begins on fol. 93*a* of the MS. described under No. **5953**, wherein this work is apparently wrongly stated as beginning on fol. 103*a* in the list of other works given therein.

Breaks off in the forty-seventh stanza.

Similar to the above.

Beginning:

कनकनिकषभासा सीतयालिङ्गिताङ्गो
नवकुवलयदामश्यामवर्णाभिरामः ।
अभिनवयुवविद्युन्मण्डितो मेघखण्डः
शमयतु मम तापं सन्ततं रामचन्द्रः ॥ १ ॥
कर्पूराङ्गविलेपनं रघुवरं राजीवनेत्रं प्रभु
कस्तूरीनिकराकृतिं कलिमलप्रध्वंसमेकं विभुम् ।
कन्दर्पायुतकोटिसुन्दरतनुं कामारिसेव्यं गुरुं
कान्तं कामदमप्रमेयममचलं सीतासमेतं भजे ॥ २ ॥

End:

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ४६ ॥
श्रीरामचन्द्रेति सलक्ष्मणेति नीलोत्पलश्यामलकोमलेति ।

No. 10314. रामस्तोत्रम्.

RĀMASTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 10224.

Complete.

Similar to the above.

Beginning:

भेरीभूरिविजृम्भणं रघुपतेराकर्ण्य घाटीमुखे
वैरिक्षोणिभुजां विहाय नगराण्येकैकशो धावताम् ।
धारानिर्भरगर्भगाः शिशुगणैर्व्याहन्यमानक्रमाः
कुर्वन्त्यो बत मज्जयन्ति करुणापूरे कठोरानपि ॥

End:

व्यूढापारकृप सुपर्वमकुटप्रौढारुणाश्मच्छटा-
गा . . . . . : . . . . ङ्करुहम् ।
सोढारं विविधापराधविततेर्मूढात्मनो मे मनो
ओ(वो)ढारं हृदये जगन्ति दनुजद्रोढारमाढ(ढौकताम्) ॥

No. **10315.** रामस्तोत्रम्.

RĀMA-STŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 5*b* of the MS. described under No. 9920.

Complete.

This hymn in praise of Rāma is intended to be sung.

Beginning:

दशरथबाल दयापर राम ताटकमर्दनदक्ष श्रीराम कौशिकक्रतुपाल कारुण्यराम कमनीय गाम्भीर्यहृदय श्रीराम॥

End:

देवगणानन्ददायक राम श्रीवत्सकौस्तुभचिह्नित राम श्रीनिवास दिव्य भद्र श्रीराम राघव ॥

* * * *

सर्वसंपत्करं सर्वपापक्षयं श्रीरामवर्णद्वयं राम ॥

No. **10316.** रामस्तोत्रम्.

RĀMASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 88*a* of the MS. described under No. 204.

Complete.

In praise of Rāma and the greatness of his name.

Beginning:

सप्तकोटिमहामन्त्राश्चित्तविभ्रमकारकाः ।
एक एव परो मन्त्रो राम इत्यक्षरद्वयम् ॥

End:

विशालनेत्रं परिपूर्णगात्रं सीताकलत्रं सुरवैरिशत्रुम् ।
सुग्रीवमित्रं जगतः पवित्रं श्रीरामरत्नं प्रणतोऽस्मि नित्यम् ॥

No. 10317. रामस्तोत्रम्.
RĀMASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 102*a* of the MS. described under No. 204.

Incomplete.

In praise of Rāma seated on the throne with Sītā in his lap.

Beginning:

वैदेहीमाधिरोप्य जातपुलकां वामाङ्कमाश्लेषिणीं
वामेन स्तनचूचुकं पुलकिना . . . ।
. . . दक्षिणपाणिना कलितया धीमुद्रया बोधयन्
रामो मारुतिसेवितः स्फुरतु मे साम्राज्यसिंहासने ॥

End:

वो(गो)ष्ठीमण्डपमासाद्य दिव्यसिंहासनास्थितः ।
विन्यस्य दक्षिणां जङ्घामन्यस्मिन्नूरुमस्तके ॥

* * * *

रत्नोर्मिकाभिरामेण माणिकङ्कणम्.

No. 10318. रामाक्षरमालास्तोत्रम्.
RĀMĀKṢARAMĀLĀSTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 30*b* of the MS. described under No. 2571.

Complete.

This hymn consists of a number of attributes in praise of Rāma, which begin with the various letters of the alphabet and which are arranged in the alphabetical order.

Beginning:

अखिलाधारं श्रीरामम्, आगमविनुतं श्रीरामम्, इष्टरक्षणं श्रारामम्, ईप्सितफलदं श्रीरामम्, उग्रपूजितं श्रीरामम्, ऊर्जितफलदं श्रीरामम् ।

End:

षट्पदकान्तं श्रीरामम्, सरसिजनाभं श्रीरामम्, हतदेवारिं श्रीरामम्, लक्ष्मणाग्रजं श्रीरामम्, क्षरणविरहितं श्रीरामम् ॥

Colophon:

रामवर्णमाला संपूर्णा ॥

No. 10319. रामानुस्मृतिः.
RĀMĀNUSMṚTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 757.

Complete.

This is taken from the Brahmāṇḍa-Purāṇa. This hymn in praise of Rāma is said to liberate one from the bondage of Saṁsāra, if it is repeated early morning every day.

Beginning:

वन्दे रामं जगद्वन्द्यं सुन्दरास्यं शुचिस्मितम् ।
कन्दर्पकोटिलावण्यं कामितार्थप्रदायकम् ॥
भास्वत्किरीटकटककटिसूत्रोपशोभितम् ।
विशाललोचनं भ्राजत्तरुणारुणकुण्डलम् ॥

End:

नित्यं चापररात्रेषु रामस्यैतां स[त्य]माहितः ।
मुच्यतेऽनस्तृ(नुस्मृ)तिं जप्त्वा मृत्युदारिद्र्यपातकैः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे ब्रह्मप्रोक्तं स्तोत्रं श्रीरामानुस्मृतिस्तोत्रं संपूर्णम् ॥

No. 10320. रामानुस्मृतिः.
RĀMĀNUSMṚTIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 190*a* of the MS. described under No. 5661, wherein this work has been mentioned as Rāmastōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 10321. रामानुस्मृतिः.
RĀMĀNUSMṚTIḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 60*a* of the MS. described under No. 6600.

Complete.

Same work as the above.

No. 10322. रामानुस्मृतिः.

RĀMĀNUSMṚTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 90*b* of the MS. described under No. 633.

Complete.

Same work as the above, but with a different colophon as given below :—

इति हिरण्यगर्भसंहितायां रामानुस्मृतिः समाप्ता ॥

No. 10323. लक्ष्मीनारायणध्यानम्.

LAKṢMĪNĀRĀYAṆADHYĀNAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 116*a* of the MS. described under No. 5673.

Complete ; as found in the Atharvaṇavēdarahasya.

In praise of Goddess Lakṣmī and God Viṣṇu.

Beginning :

क्षीराम्भोनिधिमध्यमण्डपमहासौवर्णसिंहासने
वामाङ्के स्थितया प्रसन्नवदनं श्रीकान्तयालिङ्गितम् ।
दोर्दण्डाङ्कितशङ्खपङ्कजगदाचक्रैरुदाराश्रयं
त्वामित्थं कलयामि जन्मविमुखो लक्ष्मीशनारायणम् ॥

End :

भजामि मिथुनं द्वन्द्वं लक्ष्मीनारायणात्मकम् ।
सालोक्यं चैव सारूप्यं सांनिध्यं च समाप्नुयात् ॥

Colophon :

इति अथर्वणवेदरहस्ये शिरसि लक्ष्मीनारायणध्यानोपासनं स्तोत्रं संपूर्णम् ॥

No. 10324. लक्ष्मीनारायणध्यानम्.

LAKṢMĪNĀRĀYAṆADHYĀNAM.

Pages, 3. Lines, 20 on a page.

Begins on fol. 137*b* of the MS. described under No. 2373

This is a portion of Atharvaṇarahasya.

Complete.

Same work as the above.

No. 10325. लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMINṚSIṀHAKARĀVALAMBASTŌTRAM.

Pages, 4. Lines, 24 on a page.

Begins on fol. 92*a* of the MS. described under No. 5959.

Complete.

Same work as the one described under R.No. 324(*p*) of the Triennial Catalogue of MSS., Vol. I., Part 1–A, but with the addition of two stanzas at the end as given below :—

यन्मायर्योर्जितभवप्रचुरप्रवाहमग्नार्तमात्रनिवहोरुकरावलम्बम् ।
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन स्तोत्रं कृतं शुभकरं भुवि शङ्करेण ॥
श्रीशङ्करेण रचितं सततं मनुष्यः स्तोत्रं पठेदुषसि सर्वगुणोपपन्नः ।
सद्यो विमुक्तकलुषो मुनिवर्यगम्यं लक्ष्मीपतेः पदमुपैति सुनिर्मलात्मा ॥

No. 10326. लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 9*a*. The other work herein is Saundaryalaharī 1*a*.

Almost complete.

Same work as the above.

No. **10327.** लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Pages, 11. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 9372.

Complete.

Same work as the above.

No. **10328.** लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 81*a* of the MS. described under No. 435, wherein this work has been mentioned as Narasiṁhadaśaka in the list of other works given therein.

Breaks off in the eleventh stanza.

Same work as the above.

No **10329.** लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 10279.

Breaks off in the eleventh stanza.

Same work as the above, but with the addition of one stanza at the beginning as given below :—

श्रीमन्नृसिंहविभवे गरुडध्वजाय तापत्रयोपशमनाय भवौषधाय ।
तृष्णादिवृश्चिकजलाग्निभुजङ्गरोगक्लेशव्ययाय हरये गुरवे नमस्ते ॥

No. **10330.** लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 81*a* of the MS. described under No. 9001.

Complete

Same work as the above, but without the last stanza.

No. 10331. लक्ष्मीनृसिंहप्रपत्तिः.
LAKṢMĪNṚSIṀHAPRAPATTIḤ

Pages, 3. Lines, 6 on a page.

Complete.

Begins on fol. 17*b* of the MS. described under No. 9661.

Stanzas expressing self-surrender and addressed to Nṛsiṁha as associated with Lakṣmī : by Parāṅkuśa, a disciple of Kōṭīra Raghuvīra.

Beginning :

श्रीश्रीनिवासाह्वययोगिवर्यं नारायणं योगिवरं तथैव ।
श्रीयोगिवर्यं रघुवीरदेव कोटीरसंज्ञं गुरुमाश्रयामः ॥
अहोबिले गारुडशैलमध्ये कृपावशात् कल्पितसंनिधानम् ।
लक्ष्म्या सदालंकृतवामभागं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥
श्रीमच्छठारातियतीन्द्रमाद्यं(न्यं) प्रेम्णा स्वयं प्रेक्ष(ष्ठ)मनुं प्रदाय ।
स्वाराधने प्रेरयति स्म यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥

End :

पराङ्कुशाख्येन तपोधनेन भक्त्या नृसिंहस्य कृता प्रपत्तिः ।
पापठ्यते येन भवेत्स-तस्य पूर्णं कृपापूर्णकटाक्षपात्रम् ॥

Colophon :

लक्ष्मीनृसिंहस्तोत्रं संपूर्णम् ॥

No. 10332. लक्ष्मीपतिस्मरणाष्टकम्.
LAKṢMĪPATISMARAṆĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 94*b* of the MS. described under No. 1167.

Complete.

Eight stanzas in praise of Viṣṇu as the Lord of Lakṣmī.

Beginning :

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपतेरङ्घ्रियुगं स्मरामि ॥

श्रीमन्मणिस्वर्णमयाङ्गुलीयलावण्यमञ्जीरमनोज्ञवेषम् ।
लाक्षापरिक्षिप्तमिवावभासं लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

End:

लक्ष्मीपते तेऽङ्घ्रियुगं नमामि लक्ष्मीपते तेऽङ्घ्रियुगं वहामि ।
लक्ष्मीपते तेऽङ्घ्रियुगं भजामि लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

No. 10333. वरदराजपञ्चाशत्.
VARADARĀJAPAÑCĀŚAT.

Pages, 6. Lines, 12 on a page.

Begins on fol. 13*b* of the MS. described under No. 3550.

Complete.

Fifty stanzas in praise of God Viṣṇu worshipped under the name of Varadarāja at Conjeeveram : by Vēdāntadēśika.

Beginning:

द्विरदशिखरिसीम्ना सद्मवान्पद्मयोनेस्तुरगसवनवेद्यां श्यामलो हव्यवाहः ।
कलशजलधिकन्यावल्लरीकल्पशाखी कलयतु कुशलं नः कोऽपि कारुण्यराशिः ॥

यस्यानुभावमधिगन्तुमशक्नुवन्तो मुह्यन्त्यभङ्गुरधियो मुनिसार्वभौमाः ।
तंसे(तस्यै)व ते स्तुतिषु साहसमश्नुवानः क्षन्तव्य एष भवता करिशैलनाथ ॥

End:

इति विहितमुदारं वेङ्कटेशेन भक्त्या श्रुतिसुभगमिदं यः स्तोत्रमङ्गीकरोति ।
करिशिखरिविटङ्कस्थायिनः कल्पवृक्षात् भवति फलमशेषं तस्य हस्तापचेयम् ॥

कवितार्किकसिंहाय . . . वेदान्तगुरवे नमः ॥

Colophon:

वरदराजपञ्चाशत् सम्पूर्णा ॥

No. 10334. वरदराजपञ्चाशत्.
VARADARĀJAPAÑCĀŚAT.

Pages, 12. Lines, 6 on a page.

Begins on fol. 65*b* of the MS. described under No. 9368, wherein it is apparently wrongly stated as beginning on fol. 55*b* in the list of other works.

Complete.

Same work as the above.

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु वरदराजपञ्चाशत् सम्पूर्णा ॥

No. 10335. वरदराजपञ्चाशत्.
VARADARĀJAPAÑCĀŚAT.

Pages, 7. Lines, 9 on a page.

Begins on fol. 77*a* of the MS. described under No. 9826.

Complete.

Same work as the above.

No. 10336. वरदराजपञ्चाशत्.
VARADARĀJAPAÑCĀŚAT.

Pages, 8. Lines, 9 on a page.

Begins on fol. 6*a* of the MS. described under No. 9389.

Complete.

Same work as the above.

No. 10337. वरदराजपञ्चाशत्.
VARADARĀJAPAÑCĀŚAT.

Pages, 8. Lines, 8 on a page.

Begins on fol. 8*a* of the MS. described under No. 9706.

Complete.

Same work as the above.

Colophon:

इति कवितार्किक . . तिषु वरदराजपञ्चाशत् सम्पूर्णा ॥
कवितार्किक . . . वेदान्तगुरवे नमः ॥

No. 10338. वरदराजशतकम्.

VARADARĀJAŚATAKAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 1375, wherein this work has been wrongly mentioned as Bhāvanābōdha in the list of other works given therein.

Complete.

A work similar to the above, in one hundred stanzas: by Vēṅkaṭakṛṣṇa, son of Kṛṣṇa of Kauśikagōtra.

Beginning:

काञ्च्यां काञ्चनरत्नशैलशिखरे शुण्डालशैलाग्रिमे
देशे लोकविधातृधातृविहिते देवोऽश्वमेधे हरिः ।
प्रादुर्भावमुपागतो वरद इत्याख्यां गतश्च क्रिया
द्दाचं वारिधिभङ्गडम्बरमुषं मोचासमानां मम ॥

End:

(पद्माना)यकपादपद्मयुगलीमास्वाद्य तज्जङ्घयोः
स्थित्वोरुद्वयमाप्य तत्कटितटीमाश्रित्य तन्नाभिजम् ।
पद्मं प्राप्य रमापते ग्रहमुरः प्राप्यायुधालङ्कृतान्
हस्तानाप्य मुखाब्जतन्मकुटयोर्मन्मानसं स्याद्ध्रुवम् ॥

Colophon:

श्रीमत्कौशिकवंशवारिनिलयादाचार्यरत्नाकरात्
कृष्णार्यः समभूत् कलापरिवृतः शीतांशुना निर्मितः ।
सूनुर्वेङ्कटकृष्णनामसहितस्तस्याकरोद्दैप्णवं
श्रीपादादिशिखावधिस्तवमिमं मुख्य समृद्धार्थदम् ॥

No. 10339. वरदराजस्तवः.
VARADARĀJASTAVAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 63*a* of the MS. described under No. 9826.

Complete.

Same work as that described under R. No. 175(*h*) of the Triennial Catalogue of MSS., Vol. I, Part I–A.

No 10340. वरदराजस्तवः.
VARADARĀJASTAVAḤ.

